धको देवि न दोषो यस्य कस्यचित् ॥ वर्णलक्षजपेन्मंत्री साधकः सागमीश्वरि ॥ किं किं न लभते मंत्री वांछितं सूर्यमुद्गणात् ॥ लक्षमे
कं जपे मंत्रं दशांसाधको हुनेत् ॥ तर्पयेत्तद्दशांशेन मार्जयेत् तद्दशांशतः ॥ भोजयेत्तद्दशांशेन मंत्रः कल्पद्रुमो भवेत् ॥ वंदेरंगपे
श्मशाने च शून्यागारे च तुष्पथे ॥ अर्धरात्रे थ मध्याह्ने पुरश्चरणमाचरेत् ॥ सूर्योपरागसमये गासावधिविमुक्तितः ॥ यज्जपेन्न ज्ञे
त्सिद्धभोगमोक्षैककारणं ॥ मंत्रस्यास्य महादेवि ऋषिर्ब्रह्मा समीरितः ॥ गायत्रछन्द इत्युक्तं सविता देवता स्मृतः ॥ घोध्यंवीजं परा शक्ति
स्तारं कीलकमीश्वरि ॥ धर्मार्थकाममोक्षार्थी विनियोग इति स्मृतः ॥ मायावीजेन षड्दीर्घभागिना न्यासमाचरेत् ॥ करन्यासषडंगानि
यथावदनुपूर्वशः कीलत्र्यं पठेद्द्विजपादौ साधकोत्तमः ॥ उत्कीलनं भवेद्देवि मंत्रराजस्य पार्वति ॥ शापत्रयं पठेन्मंत्री मूले मंत्रस्य·

राम:
२६

साधकः ॥ त्रिःकोटिस्त्यो भवेन्मंत्रः सर्वसिद्धिप्रदायकः ॥ संजीवनं मनुः प्रोक्तो मंत्रस्यास्य महेश्वरि ॥ मातृकाशोधितं मंत्रं कृत्वा पार्वति सा
धकः ॥ देवादिरिंदं भवाल्य सकृ शक्तिमध्ये पठेच्छिवे ॥ शिवशापं मोच्चयद्धि पुनर्नयाविभावसो ॥ इयं शापहरी विद्या जप्या साधकसत्तमैः ॥
दशधा सवितुर्देवि येन मंत्री शिवो भवेत् ॥ सिद्धमंत्रं जपेद्देवि यथाशक्त्याक्षमालया ॥ सर्वरोगविमुक्तो हि भोगमोक्षफलं भवेत् ॥ जगद
न्ने पठेद्देवि शारसत्तरं च कौलिक ॥ संपुटस्थो ह्ययं मंत्रो मंत्ररक्षामणिः परः गुरूपदेशतो ज्ञेयः सूर्यास्त्रमनुरुत्तमः ॥ यं जप्त्वा सवितु
र्मंत्री भवेत्सत्य इमो चिरात् ॥ तारं व्योपं च सूर्याय विद्महे तदनंतरं ॥ मायाशक्तिं समुच्चार्य ज्योतीरूपाय धीमहि ॥ तन्नो शिवश्च शक्तिश्च
परमात्मा प्रचोदयात् — गीता सूर्यगायत्री सर्वतंत्रेषु गोपिता ॥ दशधा साधकैर्जप्या संध्यास्वर्चासु तर्पणे ॥ ध्यानमस्य प्रवक्ष्यामि
सर्वदेवरहस्यकं सर्वरोगापहं देवि भोगमोक्षफलप्रदं ॥ कल्यान्तानलकोटिभास्वरुरुचिरं सिंदूरधूलीजपावर्णारत्नैर्किरीटिनं द्विन
यनं श्वेताब्जमध्यासनं नानाभूषणभूषितं स्मितमुखं रक्ताम्बरं चिन्मयं सूर्यं स्वर्णसरोजरत्नकलशौ दोर्भ्यां दधानं भजे एवं ध्यायेत् ॥
यंत्रोद्धारं प्रवक्ष्यामि सर्वाशापरिपूरकं सर्वसंमोहनं दिव्यं सर्वसिद्धिमयं शिवे ॥ विंदुस्त्रिकोणावसुकोणसुवृत्तरूपदिव्याष्टपत्रविल

सदहनारुणाढ्यंरेखात्रयांचितमघरासदनंचदेविश्रीचक्रमेतदुदितंसवितुर्वरेण्यं ॥ लयांगमस्ययंत्रस्यवक्ष्येपार्वतिसादरं ॥ यस्य
श्रवणमात्रेणकोटिपूजाफलंलभेत् ॥ इन्द्राग्नियमंसादवरुणानिलवित्तदाः ॥ सेशाःपूज्यावहिर्द्वारेमंत्रराजस्यसाधकैः ॥ गणेशश्च
डुवेतालोलोलाक्षोविकरालकः ॥ अंतर्द्वाभ्यांद्विविपूज्यावामावर्त्तेनसाधकैः ॥ दिव्यसिद्धमनुष्याख्यंगुरुपंक्तित्रयंशिवे ॥ पूजनत्रयेचर्चयन्मं·
त्रीगंधपुष्पाक्षतादिभिः ॥ चंद्रभौमंबुधंजीवंशुक्रंसौरंतमस्तथा ॥ केतुंचसुदलेदेविवामावर्त्याचर्चयेत्सुधीः ॥ दीप्तांसूक्ष्मांजयांभद्रांवि
मलांनिर्मलानततः ॥ विद्युतांसर्वतोवक्त्रांग्रहैर्वसुदलेचर्चयेत् ॥ सूर्यंदिवाकरंभानुंभास्करंरविमीश्वरि ॥ त्वष्टारंतपनंधर्मंचसुकोणे·
समर्चयेत् ॥ हंसंगृहपतिंदेवित्रिकोणेचत्रयीतनुं ॥ श्रीविंदुंसदलेदेविवसुकोणेत्रिकोणके ॥ तपनीतापनीचैवबोधिनीचैवरोधि
नी ॥ कलिनीशोषणीचैववरेण्याकर्षणीयतां ॥ एताःसंपूज्यवस्वग्रेकौलिकःकुलसिद्धये ॥ मायाविश्वावतीहेमप्रभांश्चाग्रेस
मर्चयेत् ॥ विस्फुरांसवितारंचविंदुकेविसमर्चयेत् ॥ कमलैःकेवलंदेवंपूजयेद्गंधाक्षितैःसुवर्णपद्मंसंपूज्यरत्नाढ्यकलशंशि
वे ॥ स्थलेनैर्विधिवद्देविनमेत्कैवल्यसिद्धये ॥ लयांगमेतदाख्यातंसर्वतंत्रेषुगोपितंमुजपत्राभिधांदेविदर्शयेदर्चनाविधौ ॥ अं

गुष्ठौ विमुष्टौ मध्ये संयोज्य तर्जनीद्वयं ॥ कनिष्ठिके च संयुज्य मध्यमानामिका पृथक् ॥ पद्ममुद्रेयमाख्याता विंदुमुद्रां शृणु प्रिये ॥ अंगुष्ठौ
विमुष्टौ मध्ये संयोज्य तर्जनीद्वयं ॥ अंगुष्ठौ सन्मुखस्थाधः सन्मुखीरंगुलीश्चरेत् ॥ उर्ध्वकरयुगं कृत्वा विंवमुद्रेयमीरिता ॥ अधोमिहृत्वा
मध्यात हृर्ध्वे सव्यमध्यगा ॥ तथैव कोलिकं कुर्याद्वामतः सव्यतोंगुली ॥ इयन्तु भास्करी मुद्रा त्रैलोक्यवशकारिणी ॥ सर्वरोगापहारण्या
नादर्शनीयार्च्चनाविधौ ॥ अंगुष्ठयोश्च वक्राकौशेयानमामयोस्ततः ॥ मितामितौ तु तर्जन्योराकुंचके न प्रलंवयोः ॥ मध्ये तु भास्करं देवं
ध्यात्वा मुद्रां प्रदर्शयेत् ॥ आवाहने च गंधाद्यैर्नैवेद्ये च विसर्जने ॥ धूपदीपादिनैवेद्यं देसं सर्वं खड्गोल्कया ॥ खड्गोल्कया महामुद्रा स
र्वरोगापहारिणी ॥ सर्वार्थसाधककरी दुःखदारिद्र्यनाशिनी ॥ वध्वा मुष्टिद्वयं देवि सर्वपर्वाणि योजयेत् ॥ अंगुष्ठयोर्निवंधोर्ध्वे सर्व
योन्मुक्तमात्तमां ॥ खड्गोल्काय महामुद्रा शत्रुवर्गविमर्दिनी ॥ रविविंवप्रणाम्याद्दर्शनाया महेश्वरि ॥ महामुद्रा महागोप्या महानामीन्द्र
वल्लभा ॥ इमां यो भानवीं मुद्रां दर्शयेत्पूजने सुधीः ॥ शतवर्षसहस्राणां पूजाया फलमाप्नुयात् ॥ प्रयोगानथ वक्ष्येहं शृणु पार्वति साद
रं ॥ येषां साधनमात्रेण मंत्रसिद्धिप्रदो भवेत् ॥ स्तंभनं मोहनं चैव मारणाकर्षणे ततः ॥ वशीकरणविद्वेषशांतिकौ पौष्टिकाभि

रु·या
६८

या:॥एतेषांसाधनंवक्ष्येसाधकानांहितेच्छया॥अप्रकाश्यमदातव्यंकलौरोगापहंप्रिये॥रवौप्रभातेशयनाउत्थायात्मवद्वयंचरेत्
स्नात्वाजपेन्महादेविसह्स्र्यौंशिवालकायुतं॥हुनेद्दशांशतोदेविपमपमाक्षशर्करैः॥सर्पिषासंभवंसद्योवादितस्फरपायसां॥१॥र
वौसध्यान्हवेलायांधयेदयुतसंख्यया॥हुनेद्दशांशांशमोशानिघृतपमाक्षनागरान्॥तर्पयेत्पयसासद्योमोहनंशुसदामपि॥२॥
रवौसायंजपेन्मूलेंनदीतीरस्थितोनरः॥अयुतंतद्दशांशेनहुनेत्पमाक्षसर्षपान्॥घृतेनदध्नासंतर्प्यमारणादिष्वतांभवेत्॥३
रवौनिशीथेसंजप्यमूलमंत्रायुतंशिवे॥हुनेद्दशांशमंभोजशटीघृतकुलुत्थकैः॥आकर्षणंभवेत्सद्योदेविनाकस्त्रियामपि॥४
रवौवामेमुहूर्त्तेतुस्नात्वातत्रजपेज्जले॥अयुतंमूलविद्यायादशांशंजुहुयात्सुधीः॥घृतमत्स्याडकर्पूरपमपमाक्षकेसरान्॥इंद्रो
पिवशतांयातिकिंपुनः॥अडभमिप॥५॥सूर्योदयेजपेद्विद्यांसाधकोयुतसंख्यया॥जुहुयात्सर्पिरंभोजमुमापर्यदशर्कराः॥वि
षेशानतर्प्ययेद्देवंभवेद्धिदेवसांद्विषां॥६॥रवावर्धोदितेदेविसूपभूसोजपेन्मनु॥अयुतंतद्दशांशेनहुनेत्घृतपद्माक्षणाः॥अंभोज
केसकृंकेठीशांतिर्भवतितत्क्षणात्॥अतिकृच्छ्रेरनाहृच्छेसजभीतेमहेश्वरि॥७॥रवावस्तंगतेप्यर्धेजपेत्कानीरमूलके॥मंत्राध्वतंमह

रामः
६८

देवि जुहुयात् घृतगोमयः ॥ पद्मच माक्षिकं जल्म मत्स्यांडार्कदलानि च ॥ दशांशं तर्पयेद् ब्रासीरेणामितयासुधीः ॥ महापुष्टिर्भवेल्लोके दे
वानामपि दुर्लभा ॥ इत्ययं पटलो गुह्यः सवितुश्चातिवल्लभः ॥ सर्वमंत्ररसायोदियोगोपनीयं मुमुक्षुभिः ॥ ॥ इति श्रीदेवीरहस्ये
तंत्रे सूर्यपटलाख्यानं नामैकत्रिंशः पटलः ॥ ३१ ॥ श्रीभैरवः ॥ अथाहं सवितुर्वक्ष्ये नित्यपूजारहस्यकं ॥ पटलं परमं दिव्यं शृणु पार्वति
सादरं ॥ पंचकृत्यमकृत्वा यो गायत्रीं संजपेच्छिवे ॥ स पातकी भवेद्रोगी यदि दशिवशासनं ॥ सवितुर्नित्यपूजायाः पद्धतिं गद्यरूपिणीं
सर्वतत्त्वरहस्याढ्यां वक्ष्ये प्राणवल्लभे ॥ ब्राह्मे मुहूर्ते चोत्थाय बद्धपद्मासनः स्वशिरस्थसहस्राराधोमुखकमलकर्णिकामध्यवर्त्तिनं ॥
श्रीगुरुं चिदानंदं ध्यात्वा नुत्वा महद्दर्शीमानंदाप्लुतो भूत्वा हंसः सोहं स्वाहेति संजप्य जपं हंसाय निवेद्य सोहं हंस स्वाहेति ध्यात्वा जन्मात्यु
रवे निवेद्य तदाज्ञां गृहीत्वा बहिरागत्य मलादीन् संतर्प्य वर्णां पूर्वं शौचमाचापदे वधावा प्राणायामत्रयं विधाय तत्त्वत्रयेणाचमनं तत्
भावनं कुर्यादिति ॥ ॐ श्रीं सर्वजनमनोहराय कामदेवाय वौषट् इति दंतान् संशोध्य ह्रां गंडूषत्रयं विधाय प्राणावेन त्रिराचम्य ॥ शिरो
मुखहृत्कुक्षिनाभिपृष्ठजंघाजानुपदेषु प्रत्येकं मूलबीजाक्षराणि — सेदिसुपस्पृश्य ॥ मायाबीजेन ताराद्येन प्राणायामत्रयं कुर्या

न॥ ह्रं १६ क्षुं १४ रें ३२ इति प्राणापानसमानोदानव्यानादीन्नियम्य नद्यादेरान्वामन्त्रयं मूलेन त्रिधा संप्लवमलापकर्षणां स्नात्वा मंनिर्म्मीय ॐ गांगीं गूं गंगे च यमुने चैव गोदावरि सरस्वति॥ नर्म्मदे सिंधु कावेरि जलेस्मिन्संनिधिं कुरु इत्यं कुशमुद्रया सूर्यमंडलात्तीर्थान्यानागय॥ भगवन्भवभूतात्तेशग्रहनायक भास्कर॥ त्रिरूपवेदनेत्रेश परमार्थहृदयप्रभो॥ यावत्त्वां पूजयिष्यामि तावन्नामो विहावतु· इत्यावाह्य ततीयमृदमंगे विलिप्य मूलेन सप्तधा समुच्चार्य कुंभमुद्रां प्रदर्श्य त्रिर्ज्जले निमज्जेत् इति स्नात्वा देवं ध्यात्वा मूलेन देवापार्घ्यत्रयं दत्वा मूलविद्यां दशधा जप्त्वा सूर्यगायत्र्या महामार्त्तण्डायार्घ्यत्रयं दद्यात्॥ ॐ ह्रां सूर्याय विद्महे ह्रीं सः ज्योतीरूपाय धीमहि तन्नो हंसः परमात्मा प्रचोदयात् ॐ हंसः महामार्त्तंडाय प्रकाशशक्तिसहिताय स्यतेर्यो नमः इति अर्घ्यत्रयं दत्वा मूलेन त्रिर्मार्जनं पूर्ववत्कमाचम्य वासोन्यं परिधाय संध्यां कुर्यात्तथा॥ जले स्वभं कृत्वा स्वदेहमुपस्पृश्य वामहस्ते जलं धृत्वा देवहस्तेनाच्छाद्य लं वं रं यं हं इति त्रिरभिमंत्र्य दक्षकरे धृत्वा तत्पतितांबुबिंदुभिः स्वमूर्द्धि सप्तदशधा संमार्ज्य इडयानीत्वा शारीरं कल्मषप्रक्षाल्य वामनासया विरेच्य तज्जलं कृष्णं पापरूपं स्ववामभागस्थवज्रशिलायामास्फालयेत्॥ इति मलापकर्षणं कृत्वा ॐ ह्रीं आत्मतत्त्वं शोधय

मिस्वाहा २ विद्यातत्वं० २ शिवतत्वं० २ त्रिराचम्यपू १६ कुं ६४ रे ३२ इति त्रिः प्राणायामं निर्माय गायत्रीं दशधा जपेत् ॥ सवितुर्देवि गा
यत्रीं कीलितो दशधा जपेत् महापातकयुक्तोपि सर्वरोगैः प्रमुच्यते इति जप्त्वा मूलं यथाशक्त्या जप्त्वा जपं देवाय समर्प्य मूलमुच्चा
र्य ॥ उदयेतमसाभासंपद्मसंस्थामचिन्मयं ॥ अभयंसम्विदाकाशमग्रन्मज्योतिरुत्तमं ॥ स्वाहेत्युपस्थायेति जलांजलिं दत्त्वा पुन
र्जले श्रीचक्रं वा योनिचक्रं विदुर्मदितं ॥ विलिख्य मूलेन श्रीमहामार्त्तण्डदेवः सूर्यः सविताविष्णुरासहितस्तर्पयतामिति द्वादशवारं
संतर्प्य प्रत्येकं परिवारदेवताः संतर्प्य पित्रादितर्प्पणं विधाय त्रिराचम्य स्नानेशायवरुणाय ॥ ॐ हं श्वं वरुणाय वौषट् इति नत्वा देवं
सदेवीकं विसृज्य हृत्कुशेशयकोशान्तर्लीनं ध्यात्वा स्नानशाटीं निर्वर्त्य यागमंडलमागच्छेत् ॥ इति सन्ध्याविधिः ततः पादौ प्रक्षाल्य गेहान्त
प्रविश्य सामान्यार्घोदकेनाभ्युक्ष्य ॐ ह्रां -- स्यै नमः ॐ गंगणपतये० ॐ सं सरस्वत्यै ॥ ॐ दुं दुर्गायै ॥ ॐ क्षां क्षेत्रपालाय मध्ये वास्तु
देवताभ्यो नमः इति पूर्वद्वारादारभ्य उत्तरहतपर्यंतमभ्यर्च्य द्वारोर्ध्वे गंगायै -- णायमुनायै द्वाराधः सरस्वत्यै ॥ उत्तरे चक्रायै मध्ये सुधा
रणाय ॥ इति संपूज्य मूलेन निरीक्ष्य छोटिकाभिः संताड्य यथार्ह आसने उपविश्य शोधनं कुर्यात् ॐ आसनशोधनमंत्रस्य मेरुपृष्ठ ऋषिः

सुतलंछन्दः कूर्मोदेवताआसनशोधनेविनियोगः॥ ॐ संपृथिव्यैनमः पृथ्वीत्वयाधृतालोकादेवित्वंदेविविष्णुनाधृता॥ त्वंचधारयमांनित्यं
पवित्रंकुरुचासनं॥ ॐ आंह्रांह्रींआधारशक्तिकमलासनायनमः ॐ अनन्तायपद्मनालायपरागेभ्यो॥ अष्टदलपद्माय सहस्रदलपद्मा
य ॐ हंसः श्रीकर्णिकायै ॐ सप्ततुरंगेभ्योइतिसंपूज्यादिव्यदृष्ट्यादेवांस्तालत्रयेणान्तरिक्षगतान्नागपार्ष्णिघातेनचभौमान्विघ्नानु
त्सार्यअपसर्पन्तुयेभूतायेभूताभुविसंस्थिताः॥ येभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया॥ इत्यक्षतप्रक्षेपेणाभूतान्निःसार्यअह्रः
अस्त्रायफट् इतिदिग्बंधनंकृत्वा ॐ हुं हंसः मांरक्ष २ हुंफट्स्वात्मरक्षांविधाय हुंफट्वासननाम वायुमापूर्यह्रींफट्कुंभयित्वासःद्
द्विरेचयेतिस्वात्मानंहंसरूपंध्यात्वा ॐ हुं हंसः इत्यानेनकुलकुंडलिनींसार्धत्रिवलयांदीर्घकालंसुत्थाप्यप्रदीपकलिकाकारांबिस
तन्तुतनीयसींतडित्कोटिप्रभांचन्द्रकोटिसुशीतलांसूर्यकोटिसमुद्दीप्तांवह्निकोटिकरालांसुषुम्नामार्गेणषट्चक्रंभित्वाब्रह्मस्थानंनीत्वा
परमशिवेनसंयोज्यसामरस्योद्भवानंदामृतेनसंतर्प्यपुनस्तेनैवयथामूलाधारंप्रापयित्वावामेपापपुरुषंश्मश्रुलंरक्ताक्षंधूम्र
वर्णंखड्गचर्मधरंअंगुष्ठाकारंविचिन्त्यहंवंरंयंहंइतिभूतबीजैःशोषणदाहनप्लावनादीन्कुर्यात्॥ यथाआदौप्राणायामयोगेना

षाड्शवारजप्तेनशोषयेत् ॥ रमितिवन्हिवीजेनचतुःषष्टिवारजप्तेनदाहयेत् ॥ वमितिवरुणवीजेनद्वात्रिंशद्वारजप्तेनाप्लावयेत् लमि
तिभूवीजेनदशधाजप्तेनदृढंविचिन्त्यहमित्याकाशवीजेनदशधाजप्तेनशून्यात्मकमात्मानंध्यात्वाहृदयारविंदकर्णिकायांदेवंसू
र्यंध्यायेत् ॥ देदीप्यमानमुकुटंस्फुरत्कुंडलमंडितं देवंसहस्रकिरणंविस्फुरालिंगितंस्मरेत् ॥ इतिध्यात्वास्वात्मानंदेवरूपंस्मृत्वा ॥ ॐ आं
ह्रीं क्रों ह्रौं हंसः ममप्राणा ममजीव इहस्थितः ममसर्वेंद्रियाणि ममवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा इहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा
इतिभूतसुद्धिप्राणप्रतिष्ठाक्रमः ततोमूलंन्यासंविधायमूलेनशिरसित्रिःसूर्यमभ्यर्च्यमंत्रसंकल्पंकुर्यात् ॥ ॐ अस्यश्रीसूर्यपूजामंत्र
स्यब्रह्माऋषिःगायत्रंछन्दःश्रीसवितादेवताह्रांवीजंह्रींशक्तिः ॐ कीलकंश्रीधर्मार्थकाममोक्षार्थेपूजायांविनियोगः श्रीब्रह्माऋषयेन
मःशिरसिगायत्र्यंछन्दसेनमोमुखेश्रीसवितादेवतायैनमोहृदिह्रांवीजायनमोनाभौ – शक्तयेनमोगुह्येॐकीलकायनमःपादयोः
धर्मार्थकाममोक्षार्थेजपेविनियोगः ॥ इतिसर्वांगेषुऋष्यादिन्यासः ॥ ॐ ह्रांअंगुष्ठाभ्यांनमः ॐ ह्रीं ह्रूं ह्रैं ह्रौं ह्रः ॥ ॐ ह्रांहृदयायनमः इ
तिकरांगन्यासः ॥ अंनमःशिरसि ॥ ह्रांनमोनेत्रयोः ह्रींनमोमुखे सःनमोहृदि ॥ सूंनमोकुक्षौ र्यांनमोनाभौ यंनमोजानुनोः नंनमोपादयोः

सू॰या
७१

मः नमः शिरसः पादपर्यंतं इतिसप्तधाव्यापयेदिति मूलंन्यासः ॥ ॐह्रृग्वेदात्मनेसूर्यायनमःशिरसि ॥ ह्रींयजुर्वेदात्मनेसूर्यायनमः
कुक्षौॐसः सामवेदात्मनेसूर्यायनमोगुह्यलिंगयोः ॥ इतित्रिर्व्यापयेत् इतिवेदन्यासः ॐह्रांआत्मरूपायसूर्यायहृदयायनमः ॥ ॐह्रींप
रमात्मनेसू॰शिरसेस्वाहा ॥ ॐह्रूंसर्वभूतात्मनेसू॰शिखा॰ ॐह्रैंज्ञानात्मनेसू॰हुं ॥ ॐह्रौंअनन्तात्मनेसू॰नेत्रेभ्योवौषट् ॥ ॐह्रःहंसात्मनेसू
र्यायअस्त्रायफट् ॥ इत्यात्मन्यासः ॐह्रांसोमात्मनेसूर्यायहृदि ॥ ॐह्रींभौमात्मनेसू॰शिरसि ॐह्रूंबुधात्मनेसू॰शिखा ॐह्रैंजीवात्मनेसू॰
हुं ॥ ॐह्रौंशुक्रात्मनेसू॰वौषट् ॐह्रःसौरात्मनेसूर्यायअस्त्रायफट् ॥ इतिषडंगाः इतिग्रहन्यासः ॐअं१२सूर्यायनमोहृदिमूलाधारे
ॐह्रांकं५सूर्यायनमोमणिपूरे ॥ ह्रींचं५सूर्यायनमःस्वाधिष्ठानेसटं५सूर्यायनमोनाहतेतं५सूर्यायनमोविशुद्धौनपं५सूर्यायनमः
आज्ञायांमःपं१०सूर्यायनमःकरंध्रे इतिसप्तधाव्यापयेत् ॥ इतिसूक्ष्मतुद्विमातृकान्यासः अंआंगायत्रीछन्दसेसूर्यायनमोब्रह्मरंध्रे ॥ इं
ईंत्रिष्टुप्छन्दसेसू॰आज्ञायां उंऊंअनुष्टुप्छन्दसेसू॰विशुद्धौ ॥ ऋंॠंलृंॡंउष्णिक्छन्दसेसू॰अनाहते एंऐंविराट्छन्दसेसू॰स्वाधिष्ठा
ने ॥ ॐऔंसम्राट्छन्दसेसू॰मणिपूरेअंअःबृहतीछन्दसेसूर्यायनमोमूलाधारे ॥ इतिसप्तधाव्यापायेत् इतिसप्तछन्दोन्यासः ॥ ॐगा

राम:
७१

श्याय सूर्याय नमो ब्रह्मरंध्रे ॥ ह्रां पंचुरश्म्याय सू॰ आज्ञायां ह्रीं सितरश्म्याय सू॰ विशुद्धौ ॐ मः श्वेतरश्म्याय सू॰ अनाहते ॐ सूर्याय हिमरश्म्याय सू॰
स्वाधिष्ठाने ॐ नः श्रीरश्म्याय सू॰ मणिपूरे ॐ मः कुन्दरश्म्याय सूर्याय नमो मूलाधारे ॥ त्रिवर्णापर्यंदिति सप्ततुरंगन्यासः ॐ अजपादेवतायै सू
र्याय नमो करंध्रे ॥ ह्रां गायत्रीदेवतायै सू॰ आज्ञायां ह्रीं सावित्रीदेवतायै विशुद्धौ मः सरस्वतीदेवतायै सू॰ अनाहते सूर्याय अक्षरीदेव
तायै सू॰ स्वाधिष्ठाने नवरत्नवर्त्तिनिदेवतायै सू॰ मणिपूरे ॥ मः पंचमुखीदेवतायै सू॰ मूलाधारे ॥ इति त्रिवर्णापर्यंतं गायत्रीन्यासः ॐ शिवत
त्वाय सूर्याय नमो ब्रह्मरंध्रे ॥ ह्रां शक्तितत्वाय सू॰ आज्ञायां ह्रीं मायातत्वाय सू॰ विशुद्धौ सः विद्यातत्वाय सू॰ अनाहते सूर्याय कालतत्वाय सू॰
स्वाधिष्ठाने नं नियतितत्वाय सू॰ मणिपूरे ॥ मः आत्मतत्वाय सू॰ मूलाधारे ॥ इति त्रिवर्णापर्यंदिति तत्वन्यासः ॐ कामरूपपीठाय सूर्याय नमः
करंध्रे ॥ ह्रां ओड्याणपीठज्ञाय सू॰ आज्ञायां ह्रीं जालंधरपीठज्ञाय सू॰ विशुद्धौ सः पूर्णागिरिपीठज्ञाय सू॰ अनाहते ॥ सूर्याय मधुपुरीपीठ
ज्ञाय सू॰ मणिपूरे पीठज्ञाय सू॰ सूर्याय स्वाधिष्ठाने नः सः वाराणसीपीठज्ञाय सूर्याय नमो मूलाधारे ॥ मूलं कुरुक्षेत्रपीठज्ञाय सूर्याय नमः सर्वां
गे ॥ इति पीठन्यासः ॥ इति द्वादशन्यासः यथा स्मुनि मायामूलविद्यादेवतामग्रहस्तु हृदय ॥ छन्दस्तु गायत्री तत्वपीठादय एव मा ॥ एते हि

रु॰या
७२

कादशान्यासाः सर्वतंत्रेषु गोपिताः वर्णितामम वै देवि शिसर्वरोगापहारकाः ॥ एतान्यङ्कुशेन्यासविधिसर्वदासिद्धये ॥ तस्यलक्ष्मीधनारो
ग्यविकीर्त्तिसुखान्वये न्यासान्तेमस्तकं ध्यायेत्पूजाकोटिफलंभवेत् ॥ अथमातृकान्यासः ॥ अंकंपङआंअंगुष्ठाभ्यांनमः ॥ इंचंपञईतर्जे·
उंटपणऊंमध्यमा॰ एंतंपऐंअनामिका ओंपंपऔंकनिष्ठिका अंयं॰॰अः करतलकरपृष्ठाभ्यांनमः ॥ एवंषडंगन्यासः इतिलिखिताः तन्मातृ
कान्यासः ॥ अंनमःशिरसि· आंनमोमुखवृत्ते ॥ इंनमोदक्षनेत्रे ईंनमोवामे उंनमोदक्षकर्णे ॥ ऊंनमोवामे ऋंनमोनासापुटे· ॠंनमो
वामे लृंनमोदक्षगंडे ॥ लॄंनमोवामे एंनमोऊर्ध्वोष्ठे ऐंनमोअधरोष्ठे ओंनमोऊर्ध्वदंतपंक्तौ अंनमःशिरसि ॥ अःनमोमुखे कंनमोदक्ष·
बाहुमूले खंनमःकूर्परे ॥ गंनमोमणिबंधे घंनमोअंगुलिनमऊर्ध्वदंतपंक्तौमूले ङंनमोअंगुल्यग्रे चंनमोवामबाहुमूले ॥ छंनमोकूर्प
रे ॥ जंनमोमणिबंधे झंनमोअंगुलिमूले ञंनमोअंगुल्यग्रे टंनमोदक्षपादमूले ठंनमोजानुनि डंनमोगुल्फे ढंनमोअंगुलिमूले णंनमोअं
गुल्यग्रे तंनमोवामपादमूले थंनमोजानुनि दंनमोगुल्फे धंनमो· अंगुलिमूले नंनमोअंगुल्यग्रे नमोवामपादमूले थंनमोजानुपंनमोदक्ष
पार्श्वे फंनमोवामे· बंनमःपृष्ठे भंनमोनाभौ मंनमोजठरे यंनमोहृदि क्षिंनमोदक्षांसे लंनमःककुदि· वंनमोवामांसे शंनमोहृदयादिद

रामः
७२

क्षपादांतगांतं षं नमो हृदादिवामहस्ताग्रांतं सं नमो हृदादि दक्षपादांतं हं नमो हृदादिवामपादाग्रांतं ळं नमः पादादिशिरःपर्यंतं क्षं
नमोः शिरसः पादपर्यंतं ॥ इति त्रिर्व्यापयेत् इति मातृकान्यासः ॥ ह्रौं नमः शिरसि हं नमो हृदि ॥ सः नमो पादयोः ॥ ह्लं शिरसः पादपर्यं
तं इति त्रिर्व्यापयेत् ॥ इति न्यासं विधाय हृत्कमलकर्णिकांतर्गतं देवं ध्यायेत् ॥ जपादाडिमबिंबाभं द्विभुजं चारुणांबरं ॥ सप्ताश्वरथसंयु
क्तं मणिकुंडलमंडितं ॥ केयूरहाराभरणोज्वलांबुजधारिणं सवितारं जगन्नाथं विष्णुरूपालिंगितं भजे ॥ एवं ध्यात्वा मानसोपचारैरभ्यर्च्य
स्ववामे त्रिकोणमंडलं विलिख्य वन्हिमंडलाय दशकलात्मने नमः ॥ इति संपूज्य त्रिपदीं क्षालितां संस्थाप्य तत्र शंखं संस्थाप्य शंखे हं अ
र्कमंडलाय द्वादशकलात्मने नमः ॥ इति संपूज्य तीर्थजलेनापूर्य सोः सोममंडलाय षोडशकलात्मने नमः सम्य नमः इत्यर्घ्यं हंसः सूर्यायक्षं
नमः ॥ इति गंधाक्षतपुष्पैः समभ्यर्च्य ॐ गां गीं गूं सां गे वः इति सूर्यमंडलादंकुशमुद्रया तीर्थान्यावाह्य ॥ ॐ ह्रां ह्रीं हंसः शुचिषदे सूर्या
य नमः ॥ इति संपूज्य ॥ धेनुयोनिमत्स्यखड्गोल्कामुद्राः प्रदर्शप्रणामेन ॥ दर्शनेनापि शंखस्य किं पुनः स्पर्शनेन च विलयं यांति पापानि
हिमवद्भास्करोदये ॥ इति सामान्यार्घ्यं विधाय स्वधार्घ्यं कुर्यात् पश्च्य सामान्यार्घ्यस्य दक्षे त्रिकोणं वृत्तं चतुरस्रं विलिख्य सामान्यार्घ्योदकं

कु.या
७३

नासुक्ष॥ॐह्रांहृदयायनमःपूर्वेॐह्रींशिरसेस्वाहादक्षिणे॥हूंशिखायैवषट्पश्चिमेॐह्रैंकवचायहुंउत्तरे॥ॐह्रौंनेत्रेभ्योवौषट्॥
अधःॐह्रःअस्त्रायफट्ऊर्ध्वेॐइतीशानेहूमित्यग्नयेसस्त्यतेइतिअस्त्रंसंपूज्यस्वामिताधारंसंस्थाप्य॥रंअग्निमंडलायदशकलात्मने
नमइत्यभ्यर्च्यतत्रसौवर्णंराजतंचापिरक्तंवामृन्मयंघटं॥स्थापयेच्छोभितंदेविमालाभिःकुंकुमार्चितं॥इतिसंस्थाप्यहंसःसूर्यायद्वा
दशकलात्मनेनमः॥इतिसंपूज्यमधुनाचेत्तापूर्यतन्नामिकोगुरुधारापातेनापूर्यसौःसोममंडलायषोडशकलात्मनेनमइतिसोमम
डलंदंपतीकरतासुडयामृतंध्यात्वातत्रानीयकुंभेनिक्षिप्यअआमित्यादिक्षांतंसुचार्यस्त्रींक्लींस्कुंभेमौमंत्रःअमृतेअमृतोद्भवेअमृताक
र्षिणिःअमृतवर्षिणिमहामांसेंदुमंडलेभ्यःहिमधारेदिव्यपरमानंदस्वरिह्रांह्रींसःहंसःसोहंस्वाहेतिदशधाजपेत्॥इतिजप्त्वासूर्यमं
डलसंभूतेवरुणालयसंभवेअमाबीजमयेदेविशुक्रशापाद्विमुच्यतां॥देवानांप्रणवोबीजंब्रह्मानंदमयंयदि॥तेनसत्येनमेदेवि
शुक्रशापाद्विमुच्यतां॥एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंपरं॥कचोद्भवांब्रह्महत्यांतेनतेनाशयाम्यहं॥ब्रह्मशापविनिर्मुक्तात्वं
मुक्ताबलशापतः॥विमुक्ताभवशापेनपवित्राभवसांप्रतं॥पावमानःपरानंदःपावमानपरोरसः॥पावमानंपरंब्रह्मतेनत्वांपावयाम्यहं

रामः
७३

इति त्रिः संपूज्य गंगादितीर्थान्यावाह्य ॥ धेनुयोनिमुद्राः प्रदर्श्य हंसः सोहं स्वाहेत्यमृतीकृत्य ॥ जलं दत्वा प्रपूजयेत् गंधाक्षतपुष्पैः सं
पूज्य ॥ महामत्तमयंतीर्थं ध्यायेदिति घटस्थापनं घटांते त्रिकोणं विलिख्य साधारं पात्रं संस्थाप्य घटामृतेनापूर्य ॥ अंतमद्रुतिक्षांतमा
तृकामालामंत्रैः संपूज्य मूलं तदोपरि जप्त्वा दिव्यखंडं भावयेदिति परमपात्रं परमपात्रान्ते गुरुशक्तिग्रहवीरपात्राचमनमधुपर्कपात्राणि सं
स्थाप्य गुरुशक्तिग्रहवीरपात्राणि तीर्थामृतेनापूर्य ॥ पाद्याचमनीयपात्रे गाजलं मधुपर्कपात्रे घृतमधुसितादि निक्षिपेत्ततः पूजाद्र
व्याणि परमपात्रामृतेनाभ्युक्ष्य धेनुयोन्यमृतीकरणमुद्राः प्रदर्श्य श्रीचक्ररत्नपीठाधारोपरि संस्थाप्य ध्यात्वा बिन्दुविराजमानं त्रिकोण
मंडितवसुकोणांचितसुवृत्तविराजितवसुदलरचितवृत्तत्रयविलसितधरणीसद्मप्रभाश्रयं श्रीचक्रं विलिख्य वा संस्थाप्य ॐ ह्रां ह्रीं
सः सोहं सः स्वाहा अं आ मित्यादिक्षांतमुच्चार्य ॥ शिवशक्तिसदाशिवेश्वरशुद्धविद्यामायाकलाविद्यारागकालनियतिपुरुषप्रकृतिअहंका
रमनोबुद्धित्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवायुवह्निसलिलपृथ्व्यादिषट्त्रिंश
त्तत्त्वस्वरूपाय श्रीयोगपीठाय नमः ॥ ॐ ह्रां अष्टदलपद्माय नमः षोडशदलपद्माय सहस्रदलपद्माय २ सप्तच्छदेभ्यो २ सप्ततुरगेभ्यो

सू.या
७४

रतिमूलंइश्रीरत्नसिंहासनायइतिसंपूज्यपश्चेकेसरांजलिंगृहीत्वार्घ्येमुद्रांबध्वाश्रीदेवपूर्वोक्तंध्यात्वाश्रीमूलान्तेविष्णुशासहिताय
सूर्यायपाद्याचमनायमधुपर्काचमनीयार्घ्यंगंधाक्षतपुष्पस्नानवस्त्रालंकाराहारकेयूरनूपुराभरणरत्नसिंहासनगंधाक्षतपुष्प
धूपदीपनैवेद्याचमनीयताम्बूलछत्रचामरशान्तिकादीन्निवेद्यमानसोपचारैः॥संपूज्यसदेवीकंदेवसूर्यनाडीनिर्गतंवायुतेजोरू
पंपुष्पमात्रंध्यात्वा॥भगवन्सर्वलोकेशसहस्रकिरणप्रभो॥यावत्त्वासर्वयिष्यामितावत्सूर्यइहावहइतिश्रीविंबविंबेपुष्पंदत्वाविंब
मुद्रयाजीवंन्यसेत॥ॐह्रांह्रींसःहंसःपरंलवंडंयंसंहंक्षःविष्णुससहितस्यश्रीसूर्यस्यप्राणाइहप्राणाः॥विष्णुशसहितस्यसूर्यस्य
जीवइहस्थितविष्णुशस॥हितस्यसूर्यस्यसर्वेन्द्रियाणि॥विष्णुशसहितस्यसूर्यस्यवाकमनश्चक्षुश्रोत्रजिह्वाघ्राणप्राणाइहैवपा
न्त्यसुखंचिरंतिष्ठन्तुस्वाहा॥इतिप्राणान्दत्वाआवाहनसंस्थापनसंनिरोधनअवगुंठनसन्मुखीकरणापरमीकरणानुपूर्वधेनुयोनिम
त्स्यपद्मबिंबमासुरवशोल्कामुजाःप्रदर्श्यमूलान्तेभगवन्सूर्यइहरत्नसिंहासनमास्यतां॥मूलान्तेपरमावरणदेवतारश्मिमंडलान्निर्ग
तंध्यात्वामूलमुच्चार्यपाद्याचमनीयमधुपर्काचमनीयार्घ्याभिमाःसर्वसमर्पयमूलान्तेभगवन्नर्घ्यंगृहाणवौषट्मूलान्तेभगवनांधंगृ

राम:
७४

हानमः ॥ मूलं भगवन्रत्नपादुकेनमः ॥ मूलं १ भगवन्रत्नसिंहासनंनमः मूलं १ भगवन्नर्घाक्षतपूर्वं पुष्पाणि गृह्णाणनमः ॥ मूलान्ते
भगवन्धूपं गृह्णाणनमः ॥ मूलान्ते भगवन्दीपं गृह्णाणनमः ॥ इति रत्नोल्कपासर्वं दत्वा आत्मपुरतः अग्रं सम्मुखं भूमौ वितिस्त्यसाधारं पा
त्रं संस्थाप्य नैवेद्यं निवेद्य मूलेनाम्रतीकृत्य रत्नशोत्सवानिरीक्ष्य मूलेन दत्तं देवाय भाजना धेनुयोनि मुद्रे प्रदर्श्य ॐ ह्रां ह्रीं सः अमृतोपस्तरणम
सि स्वाहा ॥ इति जलं दत्वा पूर्ववन्मुद्रां प्रदर्श्य ग्रासमुद्रया प्राणाय मूलान्ते देवस नरं ध्याना इदमाचमनीयं स्वधा मूलान्ते ताम्बूलं नमः ॥ मूला
न्ते सप्रथापइयणाचम्म तेन संतर्प्य ॥ त्रिस्तुत्वा मपित्रि सन्तर्प्य प्रणामेव ॥ ततः सपरिवारं देवं ध्यायेद्यथा ॥ सौम्यानि रक्तवर्णानि चरदा
त्रकराणि च भूषितानि द्विहस्तानि भासोरगानि भावयेत् ॥ दंष्ट्राकरालमत्युग्रं प्रज्वलत्पावकप्रभं ॥ तर्ज्यत्रिशूलसंयातमित्थमस्य वि
चिन्तयेत् ॥ सोमकुम्भदण्डरामं वुद्धचामीकरप्रभं ॥ सुरंगोरोचनाभासं स्तुत्वं गोक्षीरीसंनिभं ॥ कामरूपधराः सर्वे दिव्याम्बरविभूषणाः
वामेस्पृष्ट रक्तसक्तमेराख्यवामीवत्यां पूजयेत् ॥ द्वारस्यादिदेवाय धार्वनानंतरं अनुक्रमं इति शिवस्यासनं ॥ यथालं इडभी पादुकां पूजयामि
तर्पयामि नमः वीरपात्रामृतेन तर्पयेत् ॥ रं अग्निश्रीय यमश्री क्षनिऋतिश्री वं वरुणश्री यं वायुश्री ॥ सं सोमश्री हं ईशानश्री ॐ वस्म

इया
७५

श्री ह्रीं अनन्तश्रीपादुकां पूजयामि तर्प्पयामि नमः इति श्रीपञ्चपत्रे सम्यर्च्य प्रथमावरणं ॥ गं गणेशश्री उं वं वटुकनाथश्री ओं लोलाक्षश्री·
अविकरालश्री इतिगंधाक्षतपुष्पैः पूर्वदक्षिणापश्चिमोत्तरेषु वामावर्त्तेन भूमौ स्थान्त सम्पूज्य वलिपावरणं ॥ श्रीगुरुश्रीपादुरुपाद्यामृते
न सम्पूज्य संतर्प्य परमगुरुश्री परापरगुरुश्री ॥ परमेष्ठिगुरुश्री इति त्रितत्त्वे यणवायवादित ईशानपर्यन्तं सम्पूज्य तृतीयावरणं·
ज्योत्स्नादेवी दीप्तासहितसोमश्रीपा इति ग्रहपात्रामृतेन तर्प्पयेत् ॥ मं रक्षासहितमंगलश्री वं जयासहितबुधश्री ॥ जं भजसहितजी
वश्री श्री विमलासहितशुक्रश्री ॐ निर्म्मलासहितशनिश्री रविसुतासहितराहुश्री कं सर्वतोवक्रसहितकेतुश्री ॥ इतिगंधाक्षत
पल्लवाग्रे वामावर्त्तेन वसुदले पूर्वादीशानपर्यन्तं सम्पूज्य चतुर्थावरणं ॥ ॐ ह्रां ह्रीं तपनीसहीतसूर्यश्रीपा उं तापनीसहितदिवाक
रश्री उं बोधिनीसहितभानुश्री उं रोधिनीसहितभास्करश्री उं कलिनीसहितरविश्री उं शोषिणीसहितत्वष्टृश्री उं वरदासहिततपन·
श्री उं आकर्षिणीसहितधर्मश्रीपा इति श्रीपरमपात्रामृतेन स्ववामावर्त्यावसुकोणपञ्चपत्रेः सम्पूज्य पञ्चमावरणं ॥ उं मायासहित
हंसश्री ॥ उं ईशाने उं क्रिम्बवतीसहितग्रहपतिश्री इत्याग्नेये उं हेमप्रभासहितचपीनतनुश्री इत्यग्रे ॥ इतिगंधाक्षतपुष्पैः सम्यर्च्य ष

राम:
७५

स्त्रावरणं॥ ॐजगच्चक्षुर्निमयेमार्तण्डैटायेनमः॥ इतिसंपूज्यशनैर्वारयेत् मूलविद्यासुचार्यश्रीविस्फुरत्संहितसवितृश्री इतिद्वाद
शवारंशतपत्रैः केवलमभ्यर्च्यसमग्रमावरणं॥ ॐरत्नकलशश्री ॐसुवर्णकलशश्री ॐइतिपरमात्मानंतेनवामदक्षिणयोःकरकमल
योःसंपूज्यइत्यस्त्रमावरणं॥ इतिसंपूज्यमूलेनमूलदेवतांत्रिःसंतर्प्यप्रणामेत्॥ ततोमूलदेवतासहितायश्रीसूर्यायसपरिच्छ
दायपरमान्नंनैवेद्यंनिवेदयामिनमः॥ मूलेनदत्वासप्तप्रदक्षिणानिदत्वामूलान्तेमेरुपुत्रकमुद्रांप्रदर्श्यपुनःपुनःप्रणमेत्द
क्षिणांतर्गतावामीब्रामातर्गताःपराःअंगुल्योजपेर्विबिद्धांगुष्ठोसमुखोच्चरेत्॥ आवर्त्ययोमवक्षस्तवंगुष्ठेदेव्यधोमुखो॥ मेरुपु
त्रकमुद्रेयंदिव्याभास्करवल्लभा॥ नैवेद्येनप्रणामेनपुत्रकाख्यांप्रदर्शयेत् इतिनत्वासंकल्प्यपूर्ववत्षडंगंविधायप्राणायामत्रयंकृ
त्वाअर्कमालयामूलंयथाशक्त्याजपेत्॥ जपान्तेगुह्यातिगुह्यगोप्त्रीत्वंगृहाणास्मत्कृतंजपंसिद्धिर्भवतुमेदेवत्वत्प्रसादाज्जगत्प्र
भो॥ इतिदेवंजपंसमर्प्ययोनिमुद्रयाप्रणम्य॥ कवचसहस्रनामस्तवपाठंकुर्यात् तदपिदेवंउड्यादेवायसमर्प्यदंडवत्प्रणम्य
ॐह्रांबींविरवटुकायनमः॥ ॐयांसूर्ययोगिनीभ्योनमःॐक्षांक्षेत्रपालेभ्योनमःॐचांचोंतेजश्चंडायनमः॥ इतिबलिंनिवेद्यॐह्रांहूंस

ह.या
७६

र्वभूतेभ्यः सर्वविघ्नकृज्जो बलिं वो पद्‌ इति बलिं दत्वा श्रीसामयिकैः सह वीरवंदनं विधाय तद्दत्तेऽं सोहं हंस स्वाहेत्यानंदपात्रं शिरसि
निक्षिप्य पदानं दमयो भूत्वा आत्मानं तेजोमयं सूर्यरूपं विभाव्य ॐ ह्रः अस्त्राय फट्‌ सूर्यासं ध्यात्वा प्रणम्य पुष्पांजलिं दत्वा भवानी सुप
प्रदक्षिणं महारमुद्यम्श्रीचक्रे विंदुविंवात्सूर्येतेजोमयं स्वप्ययमादाय पिंगलयाघ्राय॥ तत्सौरं तेजः परमशिवेन संयोज्य पुनः स्वेहे न नि
र्गतां नामस्थियावीकालिकैः श्रियं॥ ॥इति श्रीदेवीरहस्ये तंत्रे सूर्यपूजापद्धति वर्णनं नाम द्वात्रिंशः पटलः॥ ३२॥ श्रीभैरवः॥
यो देवदेवो भगवान्भास्करो महसां निधिः॥ गायत्रीनायको भ्रस्य पवितं ति प्रगीयते॥ तस्याहं कवचं दिव्यं वज्रपंजरकाभिधं॥ सर्वमंत्र
मयं दिव्यं गुह्यं मूलविद्यारहस्यकं॥ सर्वपापहरं देवि दुःखदारिद्र्यनाशनं महाकुष्ठहरं पुण्यं सर्वरोगनिवारणं॥ सर्वशत्रुसमूह
घ्नं संग्रामे विजयप्रदं॥ सर्वतेजोमयं सर्वदेवदानवपूजितं॥ रणे राजभये घोरे सर्वोपद्रवनाशनं॥ मातृकावेष्टितं वर्म भैरवाननतनि
र्गतं॥ ग्रहपीडाहरं देवि सर्वसंकटनाशनं॥ धारणादस्य देवेशि ब्रह्मलोकपितामहः॥ विष्णुर्नारायणो देवि रणे दैत्यांजयिष्यति॥ शं
करः सर्वलोकेशो वासवो पि दिवस्पतिः॥ ओषधीशः शशी देवि शिवोहं भैरवेश्वर॥ मंत्रात्मकं परं ब्रह्म वर्म सवितुः सारमुत्तमं॥ यो

~ र्ह्लाधारं प्राप्य स्वात्मानं तेजोरूपं दिव्यं नाट्यन्स्वशक्त्या सह सुखं विहरेत् इत्येषा नित्यपूजायाः पद्धतिर्गद्यरूपिणीत

रामः
७६

धारयेद्भुजेमूर्ध्निरविवारेमहेश्वरिसराजवल्लभोलोकेतेजस्वीवैरिमर्दनः ॥ बहुनोक्तेनकिंदेविकवचस्यास्यधारणात् ॥ इहलक्ष्मीधनारो
ग्यपुत्रद्धिर्भवतिनान्यथा ॥ परत्रपरमामुक्तिर्देवानामपिदुर्लभा ॥ कवचस्यास्यदेवेशिमूलविद्यामयस्यच ॥ वज्रपंजरकाख्यस्यमुनि
र्ब्रह्मासमीरितः ॥ गायत्र्यंछन्दइत्युक्तंदेवतासवितास्मृतः ॥ मायावीजंशरच्छक्तिर्नमःकीलकमीश्वरि ॥ सर्वार्थसाधनेदेविविनियोगः
प्रकीर्तितः ॥ अस्यश्रीवज्रपंजरकवचस्यब्रह्माऋषिगायत्र्यंछन्दःह्रींवीजंसःशक्तिनमःकीलकं ॥ सर्वार्थसानेकवचपाठेविनियोगः
अंआंइंईंशिरःपातुश्रीसूर्योमन्त्रविग्रहः ॥ उंऊंऋंॠंललाटंमेह्रींरविःपातुचिन्मयः ऌंॡंएंऐंपातुनेत्रेह्रींममारुणसारथिः ॥ ओंऔं
अंअःश्रुतीपातुसःसर्वजगदीश्वरः ॥ कंखंगंघंपातुगंडौसूःसूर्यःसुरपूजितः चंछंजंझंञंचनासांमेपातुमामपर्येमाग्रजः ॥ टंठंडंढं
मुखपायाद्यंयोगीश्वरपूजितः ॥ तंथंदंधंगलंपातुमनारायणवल्लभः ॥ पंफंवंभंमंममस्कंधौपातुसःमहसांनिधिः ॥ यंरंलंवंभुजौ
पातुमूलेसकलनायकः ॥ शंषंसंहंपातुवक्षोमूलमन्त्रमयोध्रुवः ॥ लंक्षःकुक्षिंसदापातुग्रहनाथोदिनेश्वरः ॥ ङंञंणंनंमंमेपातुपृ
ष्ठंदिवसनायकः ॥ अंआंइंईंउंऊंऋंॠंनाभिंपातुतमोपहः ॥ ऌंॡंएंऐंओंऔंअंअःलिंगंमेपातुग्रहेश्वरः ॥ कंखंगंघंङंचंछंजंझं

कटिं भानुर्ममावतु ॥ टं ठं डं ढं णं तं थं दं धं जानू भास्वान्ममावतु ॥ पं फं बं भं मं यं रं लं वं जंघे मे व्याद्विभाकरः ॥ शं षं सं हं लं क्षं पातु मूलं
पातु त्रयीमनुः ॥ ङं ञं णं नं तथं दं मम मे पातु सविता सकलं वपुः ॥ सोमः पूर्वे मां पातु भौमोग्नेयां सदावतु ॥ बुधो मां दक्षिणे पातु नैर्ऋत्यां
गुरुर्वेदसां ॥ पश्चिमे मां सितः पातु वायव्यां मां शनैश्चरः ॥ उत्तरे सः तमः पातु ऐशान्यां मां शिखी तथा ॥ ऊर्ध्वं मां पातु मिहिरो मामधः स्ता
ज्जगत्पतिः ॥ प्रभाते भास्करः पातु मध्याह्ने मां दिनेश्वरः ॥ सायं वेदप्रियः पातु निशीथे विस्फुरापतिः ॥ सर्वत्र सर्वदा सूर्यः पातु मां चक्रनाय
कः ॥ रणे राजकुले द्यूते विवादे शत्रुसंकटे संग्रामे च ज्वरे रोगे पातु मां सविता प्रभुः ॥ ओं औं ओं नतः तु हंस मया सूर्योवतान्मां भयात् ह्रां ह्रीं सः
हहहा ह्सौः हसह्सौः हंसौः वतात्सर्वतः ॥ ससः ससस सः नृपाद्वनचराच्चौराद्रणात्संकटात् पायान्मां कुलनायकोपि सविता ओं ह्रीं ह्सौः स
र्वदा ॥ द्रां द्रीं द्रं दधनं तथा च तरणिर्भांभै भयाद्वाक्षतो रां रीं रुं रूं रुरूं रवि ज्वरभयात् कुष्ठाच्च शूलामयात् ॥ अं आं अं विं निवीं महामय
मयं मां पातु मार्त्तण्डो मूलव्याप्ततनुः सदावतु परं हंसः सहस्रांशुमान् ॥ इति श्रीकवचं दिव्यं वज्रपंजरकाभिधं ॥ सर्वदेवरहस्यं च मातृ
कामंत्रवेष्टितं महारोगभयघ्नं च पापघ्नं मस्तुद्दंशादितं ॥ गुह्यं यशस्करं पुण्यं सर्वश्रेयस्करं शिवे ॥ लिखित्वा रविवारे तु तिष्ये वा जन्मभे

प्रिये ॥ अष्टगंधेन दिव्येन स्ववर्णाक्षीरेतापार्वति अर्कक्षीरेण प्रोयेन भूर्जेत्वचि महेश्वरि ॥ कनकी कांस्यलेखिन्या कवचं भास्करोदये ॥ श्वेत
सूत्रेण रक्तेन श्यामेनावेष्ट्य रोद्बुधः ॥ सौवर्णेनाथ संवेष्ट्य धारयेन्मूर्ध्नि वा भुजे ॥ रणे रिपूंजयेद्देवि वादी स्वदसिद्धोष्यति ॥ राजमान्यो भवे
न्नित्यं सर्वतेजोमयो भवेत् ॥ कंठस्था पुत्रदा देवि कुक्षिस्था रोगनाशिनी ॥ शिरस्था गुटिका दिव्या राजलोकवशंकरी ॥ भुजस्था धनदा नि
त्यं तेजोबुद्धिविवर्द्धिनी वंध्या काकवंध्या वा मृतवत्सा च या गना ॥ कंठे सा धारयेन्नित्यं बहुपुत्रा प्रजायते ॥ यस्य देहे भवेन्नित्यं गुटिकैषा महे
श्वरि ॥ महास्त्राणीडमस्त्राणि निवृत्तास्मास्त्रादीनि पार्वति ॥ न देहं प्राप्य व्यर्थानि भविष्यंति न संशयः ॥ त्रिकालं यः पठेन्नित्यं कवचं वज्र
पंजरं ॥ तस्य सद्यो महादेवि सविता वरदो भवेत् ॥ अज्ञात्वा कवचं देवि पूजयेद्यस्त्रयीतनुं ॥ तस्य पूजार्जितं पुण्यं जन्मकोटिषु निष्फ
लं ॥ ज्ञात्वा वर्त्तं पठेद्धर्मसप्तम्यां रविवासरे ॥ महाकुष्ठादितो देवि मुच्यते नात्र संशयः ॥ नीरोगो यः पठेद्धर्मं दरिद्रो वज्रपंजरं ॥ लक्ष्मी
वान् जायते देवि सद्यः सूर्यप्रसादतः ॥ भक्त्या यः प्रपठेद्देवि कवचं प्रत्यहं प्रिये इहलोके सुखं भुक्त्वा देहान्ते मुक्तिमाप्नुयात् ॥ ०
इति श्रीदेवीरहस्ये तेवेवज्रपंजरकवचाख्यानं नाम त्रित्रिंशः पटलः ॥ ३३ ॥ श्रीभैरवः ॥ देवदेवि महादेवि सर्वाभयवरप्रदे ॥ त्वं मे

सू·या
७८

प्राणप्रियाप्रीतमावदेहंतवस्थित:॥ किंचित्प्रार्थयन्मेप्रेम्नावक्ष्येतन्नेददास्यहं॥ देव्युवाच॥ भगवन्सर्वभूतेशमहारुद्रमहेश्वरि॥
यदिदेयोवरंमह्यंवरयोग्यास्म्यहंयदि॥ देवदेवस्यसवितुर्वेदनामसहस्रकं॥ श्रीभैरव:॥ एतद्गुह्यतमंदेविसर्वस्वंममपार्वति
रहस्यंसर्वदेवानांदुर्लभंकामनावहं॥ योदेवोभगवान्सूर्योवेदकर्त्ताप्रजापति:॥ कर्मसाक्षीजगच्चक्षु:स्तोतुंतंकेनशक्यते॥ यस्यादिम
ध्यमंतंवसुरैरपिनगम्यते॥ तस्यादिदेवदेवस्यसवितुर्जगदीशितु:॥ मंत्रनामसहस्रंमेवक्ष्येसाम्राज्यसिद्धिदं॥ सर्वपापहरंदेवि
तंत्रवेदागमोद्धृतं॥ मंगल्यंपौष्टिकंचैवरक्षोघ्नंपावनंमहत्॥ सर्वमंगलमंगल्यंसर्वपापप्रनाशनं॥ धनदंपुण्यदंपुण्यंश्रेयस्कर
यशस्करं॥ वक्ष्यामिपरमंतत्वंमूलविद्यात्मकंपरं॥ मंत्राणामपियत्तत्वमहसामपियन्महत्॥ ज्ञोतानामपिय: ज्ञानोमनूनामपियो
मनु:॥ योगानामपियोयोगीवेदानांप्रणवश्चय:॥ ग्रहाणामपियोभास्वान्देवानामपिवासव:॥ ताराणामपियोराजावायूनांचप्र
भंजन:॥ इन्द्रियाणामपिमनोदेवीनामपियपरा॥ नगानामपियोमेरु:येनन्नगानांचवासुकि॥ तेजसामपियोवन्हि:कारणानां
चयेशिव:॥ सवितायज्जगत्यस्यापरमात्मेतिगीयते॥ वक्ष्येपरमहंसस्यतस्यनामसहस्रकंसर्वदारिद्र्यशमनंसर्वदु:खविनाशनं

राम:
७८

सर्वपापप्रशमनंसर्वतीर्थफलप्रदं ॥ ज्वररोगापमृत्युघ्नंसदासर्वभयप्रदं ॥ तत्वंपरमतत्वंचसर्वसारोत्तमोत्तमं ॥ राजप्रसाद
विजयलक्ष्मीविभवकारणं ॥ अदातव्यमभक्तायसर्वकामप्रपूरकं ॥ शृणुष्वावहिताभूत्वासूर्यनामसहस्रकं ॥ अस्यश्रीसूर्य-
नामसहस्रस्यब्रह्माऋषिर्गायत्र्यछन्दःश्रीभगवान्सवितादेवता ॥ ह्रांबीजंसःशक्तिः ह्रींकीलकंधर्मार्थकाममोक्षार्थेसहस्रस्तव
पाठेविनियोग ॥ ओंह्रांह्रींसःहंसःसोहंसविताभास्करोभगवान्सर्वलोकेशोभूतेशोभूतभावनः ॥ भूतात्मासृष्टिकृत्स्रष्टाकर्त्ता
हर्त्ताजगत्पतिः ॥ आदित्योवरदोवीरोवीरलोविश्वदीपनः ॥ विश्वकृद्विश्वहृद्भक्तोभोक्ताभीमोभयापहः ॥ विश्वात्मापुरुषसाक्षात्परंब्र
ह्मापरात्परः ॥ प्रतापवान्विश्वयोनिर्विश्वेशोविश्वमासुखकामीयोगीमहाबुद्धिर्महस्वीमनुरव्ययः ॥ प्रजापतिर्विश्ववंद्योवंदितो
भुवनेश्वरः ॥ भूतभव्यभविष्यात्मातत्वात्माज्ञानवान्गुणीसात्विकोराजसस्तामसस्तमस्वीकरुणानिधिः ॥ सहस्रकिरणो— स्वान्भा
र्गवोभृगुरीश्वरः ॥ निर्गुणोनिर्मलोनित्योनित्यानं— — —राश्रयःतपस्वीकालकृत्कालःकमनीयतनुःकृशःदुर्दृशःसदयोदाशोदी
नवन्धुर्दयाकरः ॥ द्विभुजोऽष्टभुजोधीरोदशबाहुःदशातिगः ॥ दशांशफलदोविष्णुर्जिगीषुर्जयवान्जयी ॥ जटिलोनिर्भयोभानुः

हृ॰या
७९

पल्लहल्लःकुशीरकः॥ समाहितगतिर्धाताविधाताकृतमंगल॥ मार्त्तंडोलोकभृत्त्राताहृद्योभद्रपदःप्रभुः॥ अरातिशमनःशांतः
शंकरःकमलासनः॥ अविचिन्त्यवपुःश्वेतोनिःश्रेष्ठोमहावीरपराक्रम॥ महानिंदमनोदान्तोमहामोहहरोहरिः॥ नियतात्माचकाले
शोदिनेशोभक्तवत्सलः॥ कलात्मकोकालिकनठःकर्कशःकामवल्लभ॥ व्योमचारीमहासत्वःशंभुर्भोगवल्लभः॥ सामगःपंचमोऽव्याभ्रूवो
दीनजनप्रियः॥ त्रिनेत्रोरक्तवारक्तारक्तवस्त्रोरतिप्रिय॥ कालयोगीमहानादोनिश्चलोदृश्यरूपधृक्॥ गंभीरघोषोघनहस्तोमहो
मयः॥ रक्ताम्बरधरोरक्तोरक्तमाल्यानुलेपनः॥ सहस्रहस्तोविजयोहरिगामीहरीश्वरः॥ मुंडःमुंडीभुजंगशायीसुरथस्वजित॥ न्य
ग्रोधवासन्यग्रोधोवृक्षकर्णःकलंधुरः॥ शिखीचंडीजटीज्वालीज्वालातेजामयोविभुः॥ हेमोहेमकरोहारीहारिरुल्लासनस्थितः॥ ह
रिध्वाजगत्त्रासीजगतांपतिरंगलः॥ विरोचनोविलासीचविरूपाक्षोविकर्त्तनः॥ विनायकोविभाजश्चभासोभासांपतिःप्रभुः॥ म
तिमान्रश्मिमान्दक्षोविशांपतिः॥ बालरूपोगिरिवरोगीर्यतिर्गोमतीपतिः॥ गंगाधरोगणाध्यक्षोगणसेव्योगणेश्वरः॥ गिरीश
नयनावासीसर्ववासीसतीप्रियः॥ सत्यात्मकःसत्यधर्मःसत्यसंधःसहस्रशःअपारमहिमामुक्तोमुक्तिदोमोक्षकामदःमूर्तिमा

राम:
७९

न्दुरोमूर्त्तः तुहिरुयालवामकः ॥ प्राणोपानोव्यानदोपन्नसमानोदानरूपवान् ॥ चषकोयघटिकारूपोमुहूर्त्तोदिनरूपवान् ॥ पक्षोमा
सोऋतुवर्षादिनकालेश्वरेश्वर ॥ अयनंपुराणस्त्वञ्चकृतात्रेतायुगस्त्रियात ॥ द्वापरश्चकलिकालकालोलात्माकल्पिताशनः ॥ मध्यं
तरात्मकोदेवःशक्रस्त्रिभुवनेश्वरः ॥ वासवोग्निर्यमोरक्षोवरुणोयादसांपतिः ॥ वायुर्वैश्रवणःश्वेशोगिरिशोजलशायिन ॥ अनंता
नंतमहिमापरमेष्ठीगतज्वरः ॥ कल्पांतकलनःक्रूरःकालाग्निकालसुदनःमहप्रलयकृत्कल्पकृत्याशीयुगवर्त्तन ॥ कालावर्त्तोयुगध
रोयुगादिशानकेश्वरः ॥ आकाशनिधिरूपश्चसर्वकालप्रवर्त्तकः ॥ अचिन्त्यसुवलोवालोवलाकावल्लभोवरः ॥ वरदोवीर्यदोवाग्मीवा
क्पतिर्वाग्विलासदः ॥ सांख्येश्वरोवेदगम्योमंत्रेशस्तन्त्रनायकः ॥ कुलाचारपरोनुत्योनतितुष्टोनुतिप्रियः ॥ अलपासुलभोसेव्य
स्तुष्टोरोगनिवर्हणः ॥ प्रस्कंदनोविभागश्चनीरागोदशदिक्पतिः ॥ वैराग्यस्थोविमानंदोरत्नकुंभधराउध्वः ॥ महापादोमहाहस्तो
महाकामोमहाशयः ॥ ऋग्यजुःसामरूपश्चवष्टाधर्मशाखिन ॥ सहस्रशाखीसद्वृक्षोमहाकल्पप्रियःपुमान् ॥ कल्पवृक्षश्च
मंदारोमंदराचलयेशोभन ॥ मेरुर्हिमाचलोमालीमलयोमलयद्रुमः ॥ संतानकुसुमछन्नःसंतानफलदोविराट् ॥ क्षीरांभोधिर्

ह॰या
८०

तांभोधिर्जलधिःक्लेशनाशनःरत्नाकरोमहामान्योवैन्योवेणाधरोवणिक्वसंतोमारसामंतोग्रीष्मःकश्मलनाशनः॥सर्वाकालोवर्षप
तिःशरदंभोजवल्लभःहेमंतोहेमकेयूरःशिशिरःशिशुवीर्यदःसुमतिःसुगतिःसाधुर्विष्णुःसंबोधिकासुतः॥सारग्रीवोमहाराविःसु
नंदोनंदिसेवितः॥सुमेरुशिखरावासीसप्तपातालगोचरः॥आकाशचारीनित्यात्माविभुत्वविजयप्रदः॥कुलकांताकुलोद्देशोविन
यीविजयीवियत्॥विश्वंभरोविजयचारीवियद्रूपीवियद्रथः॥सुरथःसुगतःस्तुत्योवेणुवादनतत्परः॥गोपालोगोमयोगोप्ताप्रजि
ष्णुःप्रजापतिः॥आवेदनीयोवेदज्ञोमहादिव्यवपुःस्वराट्॥निर्जीवोजीवनोमंत्रीमहार्णवनिनादभृत्॥वसुरावर्तनोनित्यस्स
र्वाम्नायप्रभुःसुधीः॥न्यायनिर्वापरःशूलीकपालीपद्ममध्यगः॥त्रिकोणनिलयश्चैत्योबिंदुमंडलमध्यगः॥बहुमालोमहामालोदि
व्यमालाधरोजपःजपाकुसुमसंकाशोजपपूजाफलप्रदः॥सहस्रमूर्द्धादेवेंद्रःसहस्रनयनोरविः॥सर्वसत्वाश्रयोवंध्योवीरवंद्यो
विभावसुः॥विश्वावसुर्वसुपतिर्वसुनाथोविसर्गवान्॥आदिरादित्यलोकेशःसर्वगामीकलामयः॥भोगेशोदेवदेवेंद्रोनरेंद्रोहव्यवा
हनः॥विद्याधरेशोयक्षेशोरक्षेशोगुरुःरक्षःकुलैकवरदोगंधर्वकुलपूजितः॥अप्सरोवंदितोजय्योजेतादैत्यनिबर्हणः॥गुह्यकेशःपि

रामः
८०

शाम्बेनःकि–राएजितःकुजःसिद्रसेव्यसमाम्नायःसाधुसेव्यसरित्पतिलङ्कास्थोदिव्यदेहोनियमीनियतेन्द्रियः॥अर्कोऽर्ककान्तिरत्ने
शोऽक्षवाहुरलोपकः॥ अलिपात्रधरोऽनंगोप्यवरेशोऽवराश्रयः॥ अकारमातृकानाथोदेवानामादिराकृतिः॥ आरोग्यकारीवानंदविग्र
होविग्रहग्रहः॥आलोककृन्तथादित्योवीरादित्यारागापिकः॥आकाशरूपःस्वाकारइन्द्रादिसुरपूजितः॥इंदिरापूजितश्चेंदुरिड्लोकाश्रय
श्विनः॥ईशानईश्वरश्चैरुद्रस्थाईकारवल्लभः॥उन्नतास्योऽप्युरुरूपउरुन्नताडिवरोगुरुः॥उत्पलोऽप्युच्चलःकेतुरुच्चैर्हयमतिःसुखी उ
काराकारसंवितस्तथोष्मानिधिभूषणः॥ऊरुहसारथिश्चोरुसमाहुरुहकारवल्लभः॥ ऋताहर्ताऋलिहरलोकऋक्षभूषणभूषिताः ऋ
प्रागोत्यासनस्थायीलृल्पंगंडयुगोज्वलः॥ ऌताकामननदम्भीनपद्मनृदृगोचरः॥ एकचक्रधरश्चैकोनेकचक्षुस्तथैकपद॥एकार
कारगांद्धस्थओंकारोऽचिंत्यमंडलः॥ ओओदंतालिरहितोमहितोमहतांपतिः॥ अंविद्याभूषणोभूष्योलक्ष्मीशोबीजरूपवान्॥अःस्व
रूपःस्वरमयःसर्वस्वरपरात्मकः॥अंभःस्वरूपमंत्राम्नाकालिकाप्तनिवर्तकः॥ कर्मैकवरदःकर्मसाक्षीकर्मघनाशनःकवर्क्षसीचक
पिलमकनकावलकारकः॥ कांतःकामनरूपिक्रूरःवीरःकेशनिषूदनः॥ कुमःकापालिकःकुब्जःकमलाश्रयग्रासःकुली॥कपालमोचकका

द्रः काश्मीरघनसारभृत् ॥ कूजत्किन्नरगीतिश्रः कुलराजः कुलेश्वरः ॥ कुवासी कुलकौलेशः ककाराक्षरसंज्ञकः ॥ खवासी खेटकेशानः ख-
कुसुंडधरः खगः ॥ खगेन्द्रवरः खेचरश्च खेचरीगणसेवितः ॥ खगांशुः खेटकधरः खलहन्ता खवर्णकः ॥ गंगागीतप्रियो योगी योगयावाली
गणाश्रयः ॥ गुणाश्रयो गोलपतिर्गुह्यलोकनिषेवितः ॥ गजध्वजो गरुडहा गांगेयवरदः पती ॥ गिरिशो गरिष्ठो गंगातो गकाराक्षरभास्करः
घृणिमान्घर्घरारावो घण्टाहस्तोऽघनाशकः ॥ घनछत्रो घनवाहनतार्पितः गतिर्घनवाहननर्पितः ॥ ङकांतो — ङकारागः चञ्चत्कुंकुम-
वासितः ॥ चंचच्चम्पकस्रग्धरोऽच्युतः चम्पकसन्निभः ॥ चामीकरप्रभः चंडभानुश्चंडीशवल्लभ ॥ चंचत्कोरककोरकेशश्च पल्लवपल्लवाश्रयः
चलत्पताकः चंद्रादिचीवरैकधरोऽचरः ॥ चित्कलावर्धितः चित्तस्थितो ध्वंसी चिन्नवर्णवान् ॥ छत्रमण्डलहस्तश्छः छुरिकः छिन्नविग्रह-
जांबूनदांगो ज्ञातो जीर्णो जेजवुवल्लभः ॥ जम्भारिर्जैरिशो जगीजनकोलहमोपहः ॥ जयकारी जराहन्ता जरामृत्युविनाशकः ॥ जगद्गो
जगज्ज्ञाता जगद्गर्भो यो जगन्निधिः ॥ जगत्साक्षी जगद्बन्धुर्जगन्नाथः प्रियो जने ॥ ञकाराकारसंयुक्तो ञ्रुंचाछन्नमतिर्ज्ञरः ॥ भिल्लीश्वरो
झंकारेशो झडुणं गुलिकराजजः ॥ झञ्झाक्षराचितो नासटीटिभासनसंस्थितः ॥ टीत्कारो टंकधारी वटः सरूपे ठठाधिपः ॥ डंभरुर्डामर-

ढिंढी डामरीशोडलाकृतिः ॥ डाकिनीसेवितो डाढीढरुग्रुस्कंधांगुलिप्रभः ॥ णोज्ञाप्रियो णाव र्णोष्ठो णाणाकारपदपंकजः ॥ तारद्विपेश्वरस्तथ्य
स्तत्रीवस्तत्तन्मयः ॥ त्रिपुरेशस्त्रिनेत्रेशस्त्रपीतनुरधोक्षजः ॥ तामसस्तामरसेक्षश्च तमोहर्त्तातमोरिपुः ॥ तंद्रहर्त्तातमोरूपस्तपसांफ
लदायकः ॥ तत्त्वादिकलताकाननतकाराक्षरभूषणः ॥ स्थाणुःस्थलीस्थितोनित्यंथर्वविरस्थांटदिलथुलु थकारजनुरन्मादेवदान
वनायकः ॥ दुर्नयोदुःखहरानानारिघ्नछेदनोदमी ॥ क्षैर्मोगम्यहर्तादेवेशोदादशाक्षराङ्गमध्यगः ॥ दादशानेकवसतिर्दादशात्मादिवस्य
तिः ॥ दुर्गमोदैत्यशमनोदुर्गोदुरतिक्रमः ॥ दुध्येयोदुष्टवंशघ्नोदयानाथोदयाकुलः ॥ दामोदरोदीधितिमान्दकाराक्षरमातृका ॥ धर्म
बंधुर्धर्मनिधिर्धर्मराजोधनप्रदयाः ॥ धराधरोधुरीणश्चधर्मात्माधर्मवत्सलः ॥ धराभृद्वल्लभोधर्मीधकाराक्षरभूषणः ॥ नंद
प्रियोनन्दरूशोनेतानीतिप्रदोनयी ॥ नलिनीवल्लभानुन्नोनायकन्त्राघवर्धनः ॥ नरनाथोनृपस्तुत्योत्योनभोगामीनमःप्रियः ॥ नमो
तोनमितारातिर्विनिर्नरनारायणाभयः ॥ नारायणोनीलरुचिर्न्नीपांगोनीललोहितः ॥ नादरूपोनादमयोनादबिंदुस्वरूपकः ॥ नाथो
नागपतिर्न्नागोनगराजाश्रितोनगाः ॥ नाकस्थितोनेकवपुर्नकाराक्षरमातृकः ॥ पद्माश्रयःपरंज्योतिःपीवरांसःपुटेश्वर ॥ पाति प्रि

यप्रेमकरः प्रणतार्त्तिभयापहः परात्परः परध्वंसी पुराधिः परसंस्थितः ॥ पूर्णानंदमयः पूर्णामेजः पूर्णोश्वरेश्वरः ॥ पद्मोलवर्णापरि
माणलेशपरात्मवान् ॥ परमेशवपुः प्रांशुः प्रसन्नः प्रणतेष्टदः ॥ अपारपारदः पीनः पीतांबरप्रियः पविः ॥ पचनः पिसुलः पुष्टः
प्रमदाजनसौख्यदः ॥ प्रमोदः प्रतिपक्षघ्नः पकाराक्षरमातृकः ॥ फलं भोगापवर्गस्य फलिनीशः फलात्मकः ॥ फुल्लदंभोजमध्यस्थ
फुल्लदंभोजधारकः ॥ स्फुटज्योतिः स्फुटाकारः स्फटिकाचलचारकः ॥ स्फुरत्किरणमालीच फकाराक्षरपार्श्वकः ॥ वालो वालप्रियो वां
तो विलध्वांतहरो वली ॥ वालादिर्व्वरध्वस्तंवद्योलामृतपानकः ॥ वुधो वृहस्पतिर्वृक्षो वृषदश्वो वृहद्बलिः ॥ वपुस्थो भीमरूपश्च भामये
मेश्वरप्रियः ॥ भगो भृगुर्भृगुस्थायी भार्गवः कविशेखरः ॥ भाग्यदो भानुदीप्तांगो भनानाभिश्च मातृका ॥ महाकालो महाध्यक्षो महाना
दो महामतिः ॥ महोज्वलो मनोहारी मार्तंडो मुंडमंडितः ॥ महावराहो मीनांको मेषगो मिथुनेष्टदः ॥ महालसो मरत्तुत्यो मुरारिवं
द्यो मनुः माधवो मेदिनीशश्च मधुकैटभमाशनः ॥ माल्यवान्मेधुलो मारो मेधावी मुसलायुधः ॥ मुकुंदो मुरारीशानो मृणालफलदोम
दः ॥ मदनो मोदको हारी मकाराक्षरमातृकः ॥ यज्ञापतेश्वरो यांतो योगिनां हृदयस्थितः ॥ याज्ञिको यज्ञफलदो यायेयामलनायकः ये

गमुङप्रियो यायोगकारस्ता योगवत्सलः॥ यष्टीधारी च यंत्रेशो योयोनिमंडलमध्यगः॥ युयुत्सुर्जयदो योद्धा युगधर्मानुवर्त्तकः॥ योगिनीच
क्रमध्यस्थो युगलेश्वरपूजितः॥ यांतो यक्षैकतिलको यकाराक्षरभूषणः॥ रामो रमराशीतश्च रत्नभानुरक्तप्रियः॥ रत्नमौलि रत्नतुंगो
रत्नपीठांतरस्थितः॥ रत्नांशुमाली रत्नाढ्यो रत्नकंकणनूपुरः॥ रत्नांगदलसद्बाहू रत्नपादुकमण्डितः॥ रोहिणीशाश्रयो रक्षाकरो रात्रिं
चरांतकः॥ रकारकारस्वरूपश्च लज्जाबीजाश्रितो लवः॥ लक्ष्मीभातुल्लतावासी लसत्वाचिश्वलोकभृत्॥ लोकांतकहरो लज्जासावल्लभो ले
मशोलिगः॥ लिंगेश्वरो लिंगाननादो लीलाकारी लंबुसः॥ लक्ष्मीवाल्लोभकृद्विध्वंसी लकाराक्षभूषणः॥ वामनो वीरवीरेन्द्रो वाचालो वाक्पति
प्रियः॥ वाचामगोचरो वांतो वेणावेणुधरो वनं॥ वाग्भवो वशिकाध्वंसी विद्यानायकनायकः॥ यकारमातृकामौलिशोभैश्वर्यपदः शु
कः॥ शशीशोभाकरः शांतः शांतिकृच्छमनप्रियः॥ शुभंकरः शुभ्रवस्त्रः श्रीपतिश्रीपनप्रुतः॥ श्रुतिगम्यः शारदाबीजमंडितः श्रेष्ठसेवि
तः॥ शिखाधारः शोषवैतालतोडनमशिपिविष्ट॥ शिविः शुक्रसेयशाक्षरमातृकः॥ षडाननषड्क्षरकः षोडशस्वरभूषितः॥ षट्च
क्रसंतोषोषडाम्नायप्रवर्त्तकः॥ षड्रसास्वादसंतुष्ट षकाराक्षरमातृकः॥ सूर्यभानुः सुरभानुः सुरिनतुः सुरत्नाकरः॥ समस्तदैत्यवं

शाघ्रसमस्तसुरसेवितः ॥ समस्तसाधकेशानसमस्तकलशेश्वरः ॥ सुरसूर्यः सुधासूर्यः स्वसूर्यः साक्षरेश्वरः ॥ हरित्सूर्यो हरिद्राश्व
हयभुक् हव्यवाहनः ॥ हालासूर्यो हेमसूर्यो हुतसूर्यो हराम्बरः ॥ क्राबीजसूर्यो ह्रीसूर्यो हकाराक्षरमातृकः ॥ लबीजमण्डितः सूर्यः सोणी
सूर्यः क्षमापतिः ॥ क्षुत्सूर्यः क्षान्तसूर्यश्च लक्षसूर्यः सदाशिवः ॥ अकारसूर्यः क्षसूर्यः सर्वसूर्यः कृपानिधिः ॥ भूःसूर्यश्च भुवः सूर्यः
स्वःसूर्यः सूर्यनायकः ॥ ग्रहसूर्यो ऋक्षसूर्यो लग्नसूर्यो महेश्वरः ॥ राशिसूर्यो योगसूर्यो मन्त्रसूर्यो मनूत्तमः ॥ तत्वसूर्यः परासूर्यो
विष्णुः सूर्यः प्रतापवान् ॥ रुद्रसूर्यो ब्रह्मसूर्यो वीरसूर्यो वरोत्तमः ॥ धर्मसूर्यः कर्मसूर्यो विश्वसूर्यो विनायकः ॥ ॥ इतीदं दे
वदेवस्य मंत्रं नाम सहस्रको देवदेवस्य सवितुः सूर्यस्यामिततेजसः ॥ सर्वसारमयं दित्यं ब्रह्मतेजोविवर्द्धनं ॥ ब्रह्मज्ञानमयं दिव्यं
पुण्यतीर्थफलप्रदं ॥ सर्वयज्ञफलैस्तुल्यं सर्वसारस्वतप्रदं ॥ सर्वश्रेयस्करं लोके कीर्त्तिदं परमं परं ॥ सर्वव्रतफलोद्रिक्तं सर्वधर्म
फलप्रदं ॥ सर्वरोगहरं देविशारीरारोग्यवर्धनं ॥ प्रभावं देवदेवस्य नाम्नां सहस्रकस्य च ॥ कल्पकोटिशतैर्वर्षैर्नैव शक्नोमि वर्णितुं
यं यं काममभिध्यायेद्वानामपि दुर्लभं ॥ तं तं प्राप्नोति सहसा पठनेनास्य पार्वति ॥ यः पठेच्छ्रावयेद्वापि शृणोति नियतेन्द्रियः ॥ सर्वी

रोधर्मिणोराजालक्ष्मीवानपिजायते॥धनवानृजायतेलोकेपुत्रवानृराजवल्लभः॥आयुरारोग्यमैश्वर्यंवाञ्छितंयस्यभवेत्संपदांप
दं॥रवौपठेन्महादेविसूर्यंसपूज्यकौलिकः॥सूर्योदयेरविंध्यात्वालभेत्कामान्यथेप्सितान्॥सक्रान्तौयःपठेद्देवित्रिकालंभक्तिपूर्वकं
इहलोकेश्रियंभुक्त्वासर्वरोगैप्रमुच्यते॥सप्तम्यांशुक्लपक्षेयःपठेदस्तंगतोरवौसर्वारोग्यमयंदेहंधारयेन्नुकौलिकोत्तमः॥व्यती
पातेपठेद्देविमध्याह्नेसंपतद्दिय॥धनंपुत्रान्यशोमानंलभत्सूर्यप्रसादतः॥चक्रार्चनेपठेद्देविजयमङ्गलंरविंस्मरन्रथीभूत्वाम
हावीरक्षमावाग्विचक्षणः॥सर्वशत्रून्विजित्याशुलभेल्लक्ष्मींप्रतापवान्॥यःपठेद्भूरदोषस्थोबहुकार्येत्वनन्यपरः॥कोनाग्निनोवी
तभयोभवेत्सशिवसन्निभः॥शतावर्तंपठेद्यस्तुसूर्योदययुगान्तरे॥सवितासर्वलोकेशोवरदःसहसाभवेत्॥वह्न्यात्रकिंमुक्तेन
पठनात्स्यपार्वति॥इहलक्ष्मींसप्तभुक्त्वापरत्राप्नोतिनव्ययं॥रवौदिविलिखेद्भूर्ज्जेमन्त्रनामसहस्रकं॥अष्टगन्धेनदिव्येननीलपुष्प
हरिद्रया॥पंचामृतौषधीभिश्चन्दनपकुपोपूषविंडुभिः॥विलिख्यविधिवन्मन्त्रीयन्त्रमध्येर्णवेष्टितं॥गुटींविधायसंवेष्ट्यमूलमन्त्र
मनुस्मरन्॥कन्याकृतेनसूत्रेणावेष्टयेद्गन्धलाक्षया॥सौवर्णेनचसंवेष्ट्यपंचगव्येनशोधयेत्॥साधारयेन्मन्त्रराजंधारयेन्मूर्द्ध्निवा

भुजे ॥ किं किं न साधयेद्देवि यन्मनसापि सुदुर्लभं । कुष्टरोगी क्षशूली च प्रमेही कुक्षिरोगवान् ॥ भगंधरार्त्तोपदंशीवानश्मरीवाश्मकृच्छ्रवान्
मुच्यते सहसाध्यान्नागुधीमतां सुदुर्लभां ॥ वंध्या च काकवंध्या च मृतवत्सा च कामिनी ॥ धारयेद्गुटिकामेनां वक्षसि स्मयतर्पिता ॥ वंध्याल
भेत्सुतं कांतकाकवंध्या च पार्वति ॥ मृतवत्सा वहून्पुत्रान्सुरूपान्श्चिरायुषः ॥ रणांगत्वा शुधीं ध्वनाशत्रूं जित्वा लभेच्छ्रियं ॥ अक्षतांगो मह
राजः सुखी स्वपुरमाविशेत् ॥ यो धारयेद्भुजे नित्यं राजलोकवशंकरी ॥ गुटिकां मोहनाकर्षस्तंभनोच्चाटनक्षमां ॥ समवेत्सूर्यसंकाशो स
हस्रामहसां निधिः ॥ धनेन धनदो देवि भवेन च वशंकरः ॥ श्रियेन्द्रो यशसा रामः त्यो हर्षे गाच भार्गव ॥ गिरा वृहस्पतिर्देवि नयेन
भृगुनंदनः ॥ वलेन वायुसंकाशो दयया पुरुषोत्तमः ॥ आरोग्येन घटोद्भूतिः कांत्या पूर्णेन्दुसंनिभः ॥ धर्मे राधर्मराजश्च रत्ने रत्नाक
रोपमः ॥ गांभीर्ये णतथांभोसिर्द्दानत्वे नेवलिस्त्वयं ॥ सिद्धाश्रीभैरवः साक्षात्परमानंदविग्रहः ॥ स्वतंत्रसप्रयांत्यन्ते तद्विष्णुःपर
मं पदं ॥ इदं दिव्यं महत्तत्वं सूर्यनामसहस्रकं ॥ अप्रकाश्यमदातव्यमवक्तव्यं दुरात्मने ॥ अभक्ताय कुचैलाय परशिष्याय पार्वति ॥ क
र्कशायाकुलीनाय दुर्जनामाशवुद्धये ॥ गुरुभक्तिविहीनाय निंदकाय शिवागमे ॥ देयं शांताय शिष्याय गुरुभक्तिपराय च ॥ कुली

नायसुभक्तायसूर्यभक्तिरतायच॥इदंतत्त्वंहितत्त्वानांवेदागमरहस्यकंसर्वतंत्रमयंगोप्यंगोपनीयंस्वयोनिवत्॥ ॥इति
श्रीदेविरहस्येतंत्रेसूर्यनामसहस्राख्यंनामचतुस्त्रिंशःपटलः॥ ३४ ॥श्रीभैरव॥अधुनादेविवक्ष्यामिस्तोत्रंमंत्रनिरूपणं॥पंच
मांगमयंतत्त्वंसर्वपापनाशनंपरं॥अष्टसिद्धिमयंसाध्यंसिद्धिदंबुद्धिवर्द्धनं॥महादारिद्र्यहरणंपुत्रपौत्रप्रदंशिवे॥भोगापवर्ग
दंलोकेरहस्यंसमपावेति॥स्तोत्रस्यास्यमहादेविऋषिर्ब्रह्मासमीरितः॥गायत्रीछन्दइत्युक्तंदेवतासवितास्मृता॥वीजंवीजोपमा
ख्यातंमायाशक्तिरितीरिता॥प्रणवःकीलकंदेविविधिंदिग्बंधनंततः॥भोगापवर्गसिद्ध्यर्थंविनियोगःप्रकीर्तितः॥देदीप्यमानमुकुटं
मणिकुंडलमंडितं॥विस्फुरल्लिंगितंध्यात्वास्तोत्रमेतदुदीरयेत्॥कल्पान्तानलकोटिभास्वरमुखंसिंदूरधूलीजपावर्णंरत्नकिरीटि
नंद्विनयनंश्वेताब्जमध्यासनं॥नानाभूषणभूषितंस्मितमुखंरक्ताम्बरंचिन्मयंसूर्यंस्वर्णसरोजरत्नकलशौदोर्भ्यांदधानंभजे॥ १
वेदाद्यंनादविंदुस्फुरितशशिकरान्तंकृतंमंत्रमूलंयोध्यायेद्देविसाध्ययनविरहितोजाड्यपूर्णोदरिद्रःसद्यःसंक्षोणिपालोज्ज्वलमु
कुटलसज्जनीराजितांघ्रिर्वागीशश्रीयतेजाःकुरुसदसिसुधापूरिताभिश्चवाग्भिः॥ २ ॥शिवाकारंवह्निशशधररुचाविंदुललितं

सू·या
८५

विभोध्यायेच्छिनेमनुमुदुकरन्नेजपत्तियः॥ससंग्रामेजित्वासकलरिपुसंघातमविराद्भवेत्स्माद्भूमौव्रजतिपरासुस्तवपदं॥ ३ ॥
योमाल्लनारूढमितिस्मरेद्योदक्षाक्षिविंदेनुकलाभिरामं॥गत्र्यादिव्यामृतवर्षिणीवाग्वक्त्रेविभोतस्यकरस्थिताभी॥ ४ ॥ज्ञानि
भक्तिप्रीतोजपेद्यदिमनोर्मध्येसमरभास्वरंरात्रौतोनिजशक्तिकामरसिकोहालारसेनालसः॥वीरोवीर्यमयोनिरामयवपुर्मूर्त्त्वेहमुना
भ्रियंस्वर्गस्त्रीजनवीजितःसभगवान्धामाद्ययंयास्यति॥ ५ ॥सूर्यायेत्यभिधाक्षराणिजपतेयोदेवसूर्योदयेसूद्धः॥ज्ञोकवृतोमहा
मयमयोदारिद्र्यपीडाकुलः॥सद्योगच्छतुपद्मसारसरलानिर्यातिधारीमुखान्तस्यारोग्यतनोर्भवतिभगवद्दृष्ट्याःसदासंपद॥६
विश्वंविश्वमनोविभोंच्चलगतंयोमानसेसंजपेद्गत्रौकामकलासमाहितननुःकामातुरः॥कौतुकीकामसंहतनिसोन्तमोनमतमाकाम
भिरामासमासद्यस्तस्यवशीभविष्यतिमहातेजस्विनोमानिनः॥ ७ ॥मणिमुकुटमरीचिस्फीतभास्वल्ललाटंकनकरुशादिव्यांभोजह
स्तारविंदं॥निखिलनिगमगम्यंविस्फुरांसिंगित्यंगंमनसिसरसिजेहंसूर्यमीशंनमामि॥ ८ ॥भूगेहशोभितपरारत्नाभूषि
तास्त्रपत्रांविनात्मभवकोशसुरास्नविंदो॥देवंनिषण्णमदिराग्रसहस्रभास्वद्देवंभजामिभगवन्तमनन्तमाद्यं॥ ९ ॥इतिस्तोत्रंमे

राम:
८५

त्राल्मकमखिलंतंश्रोहृतमिदंपठेन्नानस्नातोनिहरभुवनेशस्यभवतः॥ भवेद्रोगीमुक्तोविभवसहितःकीर्त्तिसहितःपरत्रांतेविस्नो·
र्व्रजतिपरमंधामसवितुः॥१०॥ इतीदंदिव्यपंचांगंदेवदेवस्यभास्वतः॥ तवस्नेहान्मयाख्यातंनाख्येयंयस्यकस्यचित्॥ यत्गृहेवर्त्तते
पुरायंपंचांगंपरमात्मनःसवितुःसर्वसर्वस्वंरहस्यंगुह्यमुत्तमं॥ तत्गृहेनिश्चलालक्ष्मीःसदैवसुस्थिराभवेत्॥ नाग्निभीतिर्नदारिद्र्यंन
रोगोनाप्युपद्रवः॥ नराजभीतिर्नशोकःसर्वदासंपदागृहे॥ इदंतत्त्वंहितत्त्वानांरहस्यंदेवदुर्लभंअदातव्यमभक्तायदातव्यंचमहा
त्मने॥ गुह्यातिगुह्यगुह्यंतत्सूर्यपंचांगमुत्तमं॥ सर्वथासर्वदागोप्यंपठनीयंस्वयोनिवत्॥ ॥इतिश्रीदेविरहस्येतन्त्रेपरमार्थ
सौत्राख्यानेनामपंचत्रिंशःपटलः॥३५॥ इतिसूर्यपंचांगसंपूर्णाम्॥ ॥पाषाणमंडितेपद्मरागशिलायुक्तामणिमा
णिक्यभूषिते॥ वसन्तकुसुमामोदगंधवाहैकवाहिते॥ श्रीॐनमोलक्ष्मीनारायणाय॥ श्रीभैरवः॥ कैलासोत्तुंगशिखिरेरत्नरा
जिविराजिते॥ कल्पद्रुमवनाकीर्णस्वर्णपाषाणमंडितेपद्मरागशिलायुक्तामणिमाणिक्यभूषिते॥ वसन्तकुसुमामोदगंधवा
हैकवाहिनि॥ नवरत्नशिलाबद्धपीठस्थंपरमेश्वरं॥ देवदेवंजगन्नाथंपार्वतीसहितंविभुं॥ वसंतंवजपंतंवध्यायन्तंब्रह्मशाश्व

तं ॥ पन्नगाभरणोपेतं जटामुकुटमंडितं ॥ कपालखट्वांगधरं वराभयधरं हरं ॥ देवदानवयक्षेन्द्रपिशाचोरगसेवितं ॥ गणगंधर्वसि
द्धयक्षनरैरर्चितमव्ययं प्रसन्नवदनं देवं देवी पृच्छ महेश्वरं ॥ प्रणम्योत्थाय सहसा बद्धांजलिपुटं पुरः ॥ उवाच पार्वती दीना शिवं त्रैलो
क्यनायकं ॥ श्रीदेव्युवाच ॥ भगवन्देवदेवेश देवासुरनमस्कृत त्वं शिवः सर्वलोकेशः सत्यः सच्चित्स्वरूपकः ॥ अनन्तः परमात्मेति त्रिज
गत्कारणप्रभुः ॥ उत्पत्तिः स्थितिकृत्क्षिप्रं लयकृत्सुभुवनेश्वर ॥ अनादिनिधनो देवस्त्रिगुणात्मापि निर्गुणः ॥ किं तत्परं महत्तत्वं यज्जाप
स्य यसंततं ॥ तत्तत्त्वं श्रोतुमिच्छामि त्वत्तो भक्तास्मि किंकरी ॥ श्रीभैरवः ॥ लक्षवारसहस्राणि वारितासि पुनः पुनः ॥ स्त्रीस्वभावान्महा
देवि पुनर्मां परिपृच्छसि ॥ भक्त्यानया प्रसन्नोहं तव पार्वति तत्त्वतः ॥ एतद्रहस्यपरमं वक्ष्ये गुह्यं दिवौकसां ॥ अवक्तव्यमिदं तत्त्वं मदा
नवं महेश्वरि ॥ तव स्नेहेन वक्ष्यामि न चाख्येयं महात्मभिः ॥ यो देवदेवो वरदो लक्ष्मीनारायणप्रभुः ॥ सर्गस्थितिकरो लोके प्रलयांतक
रो लये ॥ स एव परमेशानि देवपन्नगराक्षसां ॥ दैत्यकिन्नरयक्षेन्द्रमनुजानलपाथसां ॥ ब्रह्मादिकीटपर्यन्तं जगत्त्रितयकारणं ॥ अ
ध्यक्षः सात्विकः सर्वभूतात्मा परमेश्वरः ॥ तस्य देवस्य पंचांगं पटलं पद्धतिं शिवे ॥ कवचं तत्स्वभूतं च मंत्रं नामसहस्रकं ॥ स्तोत्रं जपा

मि देवेशि स्मरामि मनसा सदा ॥ पठनस्यहर्निशं शान्तः परमानन्दकारणं ॥ श्रीदेव्युवाच ॥ पंचांगं देवदेवस्य लक्ष्मीनारायणस्य च श्रोतुमिच्छाम्यहं नाथ वक्तुमर्हसि सांप्रतं ॥ श्रीभैरवः ॥ परमार्थप्रदं देवि पंचांगं सर्वसिद्धिदं ॥ वक्ष्यामि परमेशस्य लक्ष्मीनारायणस्य ते तत्रादौ पटलं वक्ष्ये मूलविद्यारहस्यकं ॥ मंत्रोद्धारं प्रवक्ष्यामि लक्ष्मीनारायणस्य ते ॥ अष्टप्रदं सहस्रः साधकानां सुदुर्लभं ॥ तारं परां वहिंतं पराल्लक्ष्मीहृतोभिधं ॥ लक्ष्मीनारायणायेति विश्वमंत्रे मनुः स्मृतः ॥ नास्य विघ्नो न वादोस्ति न भीतिर्न विपर्यय ॥ साक्षान्मोक्षप्रदो मंत्रः सर्वार्थफलदायकः ॥ वैरराये भ्रम ज्ञानेश्च पुरश्चरणमाचरेत् ॥ वर्णलक्षं पुरश्चर्यं विना यंनो सिद्धिपभाक ॥ जीवहीनो यथा देहः सर्वकर्मसु न क्षमः ॥ पुरश्चरणहीनो हि मंत्रः फलदायकः ॥ वैरराये भ्रम ज्ञाने च शून्यागारे चतुष्पथे अर्धरात्रे च मध्याह्ने पुरश्चरणमादिशेत् ॥ वर्णलक्षं पुरश्चर्यं तदर्धं वा महेश्वरि ॥ एकलक्षावधिं कुर्यान्न तो न्यूनं कदाचन ॥ प्रथमं गुरुहस्तेन साधकस्य करेण वा ॥ ततः स्वयं चरे — दीपुरश्चर्याविधानतः ॥ जप्याद्दशांशतो होमस्तद्दशांशेन तर्पणं मार्जनं तद्दशांशेन तद्दशांशेन भोजनं ॥ विना दशांशहोमेन न ततः फलमवाप्नुयात् ॥ पंचरत्नेश्वरी विद्यां लक्ष्मीनारायणस्य हि

हृ·या
७

जपेल्लक्षं पंचभिः सांगपुरश्चर्याफलं लभेत्॥ अथ मंत्रस्य देवेशि संस्कारविधिमाचरेत्॥ विधिना येन सुस्थस्तु साधकः सिद्धिमा
न्भवेत् उत्कीलयेन्मनुं देवि ततः॥ संजीवयेत्पुनः विद्यांसाधय ह्रीं देवि जपेत्स कुरुख्वकेतः॥ सिद्धमंत्रं जपेद्देवि पुनः संपुटितं च
रेत्॥ रूपयोगवरो मंत्रो योगिनां तु र्लभः किल॥ अथोत्कीलमावक्ष्ये मंत्रस्यास्य महेश्वरि॥ पतार्ता हरितं भूतिमा नाम सकलं पठेत्
विद्यानेप्रणवो देवि सकृदुच्चारयेत्सुधीः॥ मंत्रोत्कीलनमेतत्स्यात्सर्वतन्त्रमयं शिवे॥ मंत्रसंजीवनं वक्ष्ये शृणु पार्वति सादर
पराविभूतिमातारं नामान्ते विश्वमीरितं॥ संजीवनाख्यो गदितो मन्त्रराजो महेश्वरि॥ शिवेन वर्णितं विद्यां शिवेशापहां जपेत्
वक्ष्यामि तव मन्त्राहं गुह्यं सर्वार्थदायिनी॥ तारंपरांचिदेवेशि शिवस्तशापततः पठेत्॥ मोचयद्वयमधृत्य परमाठद्वयं जपेत्
विद्येयं दुर्लभा लोके लक्ष्मीनारायणप्रिया॥ सिद्धमंत्रं जपेन्मंत्री पुनः संपुटितं चरेत्॥ संपुटस्यामनुं वक्ष्ये सर्वागमसमुद्धृ
तं॥ विश्वमादौ समं तु पश्चान्नमवान्ते जपेत्प्रिये॥ संपुटाख्यो मनुर्देवि वर्णितो यत्कलाप्नये॥ मंत्रस्यास्य महादेवि वर्णितोत्र ऋषिः
शिवः॥ त्रिष्टुप्छन्दो मया ख्यातं देवतापि समीरितः॥ लक्ष्मीनारायणो देवि बीजं लक्ष्मी हृदाहृता॥ शक्तिः परा तथा तारं कीलकं

राम:
७

समुदाहृतं ॥ भोगापवर्गसिध्यर्थं विनियोगः प्रकीर्त्तितः ॥ ध्यानमस्य प्रवक्ष्यामि लक्ष्मीनारायणास्यते ॥ येनैव ध्यानमात्रेण लक्ष्मी
संनिधिर्भेष्यति ॥ पूर्णेन्दुवदनं पीतवसनं पीनवसनं कमलासनं ॥ लक्ष्म्याश्रितं चतुर्बाहुं लक्ष्मीनारायणं भजे ॥ नारमाभूतिवि
जैसृयदृदः यांति महेश्वरीन्यासं कुर्यात्षडंगानि दिकरेषु आदिपूर्वकं ॥ यंत्रोद्धारं प्रवक्ष्यामि सर्वज्ञासिद्धिदं परं ॥ सर्वसंमोहनं यं
त्रं वांछितैकप्रदायकं ॥ विंदुस्त्रिकोणं वस्वश्रं वृत्ताष्टदलसंयुतं ॥ षोडशारं वृत्तं च भूगृहेनोपशोभितं ॥ लक्ष्मीनारायणस्यैत
न्मोवज्रं परमार्थदं ॥ लयांगदेवि वक्ष्यामि भोगमोक्षफलप्रदं ॥ वेदादिगमरहस्यास्य पूजा कोटिफलप्रदं ॥ वज्रशक्तिदंड
खड्गपाशांकुशध्वजास्ततः ॥ शूलपूज्याः शिवेच्चैते वाप्यवारि वसर्वदा ॥ इज्यानियममांसादेवरुणानिलचितदः ॥ सेश्वरा
साधकैः पूज्यास्तस्मान्नंतादयस्ततः केशवं माधवं कृष्णं गोविंदं मधुसूदनं ॥ गंगाधरं शंखधरं चक्रपाणिं चतुर्भुजं ॥ पद्माउधं कै
टभारिं घोरदंष्ट्रं जनार्दनं ॥ वैकुंठवामनंश्चैव पूजयेत् गुरुरुद्ध्वजं घोरज्ञारेभुवेशिवामा वर्त्तनसाधकः ॥ तत्रार्चयेन्महादेवि मंत्री
गुरुवत्पूजय ॥ असिनागहस्तकेतुवंशीपाणीं च पूजयेत् ॥ नूतनत्रयके देवेशि सप्तकोजधपुष्पकैः ॥ संहारस्थंकं घंडभूतेशंका

नभैरवं॥ कपालं भीषणं चैव तथा श्मशानभैरवा॥ पूजयेत्साधकः सिद्ध्यै वसुपत्रे महेश्वरि॥ विष्णुं च वामदेवं च देवि दामोदरं तथा
नृसिंहं च महादेवि देवं संकर्षणं तथा त्रिविक्रमं वानिरुद्धं हृषिकेसं च साधकः॥ लक्ष्मीं श्रद्धां कीर्त्तिं देवि वसुकोणेषु पूजयेत्॥ ग
गांच यष्ठनां चैव अम्भे सरस्वतीं तथा॥ पूजयेच्छ्रवल्लीशङ्कमयोगेन पार्वति॥ लक्ष्मीनारायणं देवं पूजयेद्धि तु मंडले॥ महालक्ष्मीं
राज्यलक्ष्मीं सिद्धलक्ष्मीं च पूजयेत्॥ शङ्खं चक्रं गदां पद्मं पूजयेद्धि तु मंडले॥ गंधाक्षतप्रसूनादि गुरुमाल्यविभूषणैः॥ संपू
ज्यामृतकुंभस्थैर्विंदुभिर्मंत्रपूजितैः॥ तर्पयेत्साधको देवं मकारैः पंचभिः परं॥ जयंत्रमेतत्समाख्यातं प्रयोगानथ पार्वति॥ वक्ष्ये येन
भवेत्सिद्धिर्मंत्रस्यास्य विशेषतः॥ स्तंभनं मोहनं चैव मारणाकर्षणे ततः॥ वशीकारं तथोच्चाटं शान्तिकं पौष्टिकं तथा॥ एतेषां सा
धनं वक्ष्ये प्रयोगानां महेश्वरि॥ एषां साधनमात्रेण मंत्रसिद्धिः प्रजायते॥ रवौ स्नात्वा महादेवि गत्वा महादेवि गत्वाश्वत्थतरोस्तलं॥ अ
पिदस्थुतमीशानि हस्तेनन्त्वद्दशांशतः॥ घृतमन्स्यां तु गुडजैर्दुग्धैरानंदमिश्रितैः॥ स्तंभनं जायते सद्यो वादीवानार्कपायसं॥ चंद्रेर्धरा
त्रवेलायां गत्वाभ्रं गारके सुधीः॥ दिक्षोव ध्यासनं ज्ञो ध्यपुराणायामसविधाय च॥ जपेन्मूलं हरिध्यात्वा हुत्वा देवि दशांशतः॥ घृतनागर

नाक्षं रंजकसमातिच ॥ तर्पयित्वा दशांशेन मार्जयित्वा महेश्वरि ॥ तदा स्मना चेरज्ञाले तिलकं साध्यकोत्तमाः ॥ त्रैलोक्यं सहसा दत्स्तम्भे
हमेष्यति न सुखं ॥ भौमे गत्वा श्मशाने च जपेद्युतसंख्यया दशांशतो दधिसर्पिर्गोधूमपायसं दूर्वापत्रमासवं चमत्सुखप्रिय
यते क्षणात् ॥ ३ ॥ बुधे गत्वा पर्वीं इं रं जपेत् कं जाते दृष्टिवे ॥ अयुतं मूलमंत्रं च हुनेत्सर्पिर्यवान्नकान् ॥ दूर्वापूतासमप्रक्षिपज्ञातिकु
सुमानिच ॥ रंभापि पुरतस्तस्य सच्चः प्रादुर्भविष्यति ॥ ४ ॥ गुरौ गत्वा नदीतीरं जपेन्नत्र दशांशतः ॥ हुनेदाज्यं मधुनाज्यं चतुःकरी
रकान् ॥ तदा स्मनासाधितेनैत्रैलोक्यं वशमेष्यति ॥ ५ ॥ शुक्रे शोककर्तरगत्वा जपेद्युतसंख्यया ॥ हुनेत्सर्पिर्नागपदं शानि -- गुपा
कुलं तर्पयेदासवाज्येनेक्षुरसैर्मुक्ता दशांशतः ॥ शनैः शमसमानस्यभवे कुञ्चारनेध्रुवं ॥ ६ ॥ शनौ गत्वा नदीतीरं - यद्युतं संख्य
या ॥ होमो दशांशतः कार्यो घृतपायसकुंकुमैः ॥ मारणादीनि कुप्रकुले शांतिकं जायते क्षणात् ॥ ७ ॥ शुभे चन्द्रे शुभवारे गत्वा पवनमंडलं
जपेद्युतमीशानि जुहेदाज्येन पंकजं ॥ सोत्पलं सकुंकुमं साम्लं नवभक्त्या मयोदितं ॥ लक्ष्मीनारायणस्येदं सर्वस्वं परमार्थदं ॥ अदात
व्यमभक्तेभ्यो दुष्टेभ्यो वीरवंदिते ॥ महावीनपदस्थेभ्यो भोगदं मोक्षदं कलौ ॥ गोप्यं गुह्यतमं तंत्रं गुह्याद्गुह्यतमं शिवे ॥ आनंदकारणं

दे॰या
८९

गोप्यंगोपनीयंस्वयोनिवत्॥ ॥इतिश्रीदेवीरहस्येतन्त्रेश्रीलक्ष्मीनारायणपटलाख्यानेनामषट्त्रिंशःपटलः॥ ३६॥ श्रीभैरवः
अधुनादेविवक्ष्येहंगद्यपद्यैकरूपिणि॥ पद्धतिंनित्यपूजायालक्ष्मीनारायणस्यते॥ ब्राह्मेमुहूर्त्तेचोत्थायबद्धपद्मासनःस्वशिरस्थ
सहस्राराधोमुखकमलकर्णिकान्तर्गतंनिजगुरुंश्वेतालंकारालंकृतंध्यात्वामानसैरुपचारैरभ्यर्च्यतदग्रेमूलंस्वशक्त्याजप्त्वातज्जप
गुरवेसमर्प्यतदाज्ञामादायनद्यासैगत्वा॥ ॐक्लींसर्वजनप्रियायकामदेवायनमः॥ इतिदन्तान्विशोध्यात्मशुद्धिंकृत्वामन्त्रत्रयंमूले
नसंशोध्यमलापकर्षणंस्नानंकृत्वामन्त्रस्नानंचरेत्॥ तत्रमन्त्रः॥ ॐगांगींगूंगंगेचयमुनेचैवगोदावरीसरस्वती॥ नर्मदेसिंधुका
वेरिजलेस्मिन्संनिधिंकुरु॥ इत्यङ्कुशमुद्रयावाह्यमन्त्रः॥ ओंमूलंदेवेशभक्तिसुलभपरिवारसमन्वितयावत्त्वांतर्पयिष्यामितावद्दे
वइहावह॥ इत्यावाहनमुद्राःप्रदर्श्यमृदमंगेविलिप्यजलेत्र्यश्रंविभाव्यत्र्यश्रेमूलंविलिख्यतत्रमूलमुच्चरन्त्रिरुन्मज्जेत्॥ ततःसूर्याया
र्घ्यत्रयंदद्यात्॥ ओंह्रींहंसःसूर्यायएषतेर्घ्योनमः इत्यर्घ्यत्रयंदत्वाजलादारुह्यवासामूलमुच्चारसिपरिधायदेहशुद्धिंविधायमूलर्षि
न्यासादिंविधायमूलंयथाशक्त्याजप्त्वाघमर्षणंकुर्यात्॥ वामहस्तेजलंधृत्वादक्षहस्तेनाच्छाद्यहंयंरंलंवंइतिसप्तधाभिमन्त्र्यतज्जलि

राम:
८९

तोदकविंदुभिर्मूलमुच्चरञ्चतुर्दशधा शिरः॥ प्रोक्षावशिष्टजलं दक्षहस्ते धृत्वा इडयानीत्वा पापं प्रक्षाल्य॥ तज्जलं कृष्णवामनासापु
टेन वहिर्रेचयित्वा वामभागस्थवज्रशिलायामास्फालयेदित्यघमर्षणं ततः॥ पूर्ववन्न्यासं विधाय गायत्रीं जपेत्॥ ओं ह्रीं लक्ष्मीनाराय
णायदिद्महे जक्षोपरंब्रह्म धीमहि तं श्रीतन्नः परमात्मा प्रचोदयात्॥ ३॥ इति यथाशक्त्या जप्त्वा श्रीगायत्र्यासांगाय सवाहनाय परि
छदाय सशक्तिकाय श्रीलक्ष्मीनारायणाय एष तेऽर्घो नमः॥ इत्यर्घत्रयं दत्वा प्राणायामं कृत्वा पू १६ कुं ६४ रे ३२ इति प्राणायामत्र
यं विधाय॥ ओं ह्रीं आत्मतत्त्वं शोधयामि स्वाहा॥ विद्यातत्त्वं शोधयामि स्वाहा॥ शिवतत्त्वं शोधयामि स्वाहा इत्याचम्य पूर्ववत्सूर्यायार्घ्यं
त्रयं दत्वा देवताकवचं पठित्वा यथाशक्त्या तर्पणं कुर्यात्॥ श्रीमूलमुच्चार्य सांगसपरिवारसवाहन॥ सदेवीक नारायण तृप्यतां इति त्रि
स्तर्प्य मूलविद्याक्षरमुच्चार्य एकैकांजलिना परिवारान्संतर्प्य देवर्षिपितॄन्संतर्प्य पूर्ववत्सूर्यायार्घ्यं दत्वा सहस्रमुद्रया देवतां प्रण
म्य यागमंडपं प्रविशेदिति संध्याविधिः॥ तत्र पादौ प्रक्षाल्य द्वारमध्ये देहल्यां गुल्फचतुरस्रवृत्तमंडलं विलिख्य तत्र क्षालिताधारं सं
स्थाप्य अस्त्राय फट् इति साधारं पात्रं संस्थाप्य ओं हृदयाय नमः इति हृन्मन्त्रेणापूर्य ओं लक्ष्मीनारायणाय सामान्यार्घ्याय नमः॥ इत्यभ्यर्च्य ओं

गंगेतितीर्थमावाह्यधेनुमुद्रांप्रदर्श्यशरमभिषेचयेदितिसामान्यार्घ्यविधिः॥ पूर्वेगंगणपतयेनमः॥ वंवटुकायदक्षेक्षांक्षेत्रपा
लाय॥ पश्चिमेयांयोगिनीभ्योउत्तरे॥ गांगंगायैदक्षेयंयमुनायै·वामे·संसरस्वत्यैउर्ध्वे·अधोदेहल्यांअस्त्रायफट्इतिद्वारदेवीः संपू
ज्यद्वारांतःप्रविश्य॥ विहितासनेउपविश्यमूलेननिरीक्ष्यकवचेनावगुण्ठ्यअस्त्रायफडितिसंताड्यपूजासंस्टपंसंधूपितंकृत्वावि
घ्नशुद्धिंकुर्यात्॥ ओंआंआसनमंत्रस्यमेरुपृष्ठऋषिःसुतलंछन्दःकूर्मोदेवताआसनशोधनेविनियोगः॥ ह्रींपृथिव्यैनमः॥ महि
त्वयाधृतोलोकस्त्वंदेविविष्णुनाधृता॥ त्वंचधारयमांदेविपवित्रंकुरुचासनं॥ ओंक्लींआधारशक्तिकमलासनायनमः॥ अनंताय
पद्मायपद्मनालायतत्रोपविश्यतालत्रयंदत्वा॥ ओंअपसर्प्पंतुयेभूतासुविसंस्थिताः॥ येभूताविघ्नकर्त्तारस्तेनश्यंतुशिवाज्ञया
वामपार्ष्णिघाततत्रयेणविघ्नानुत्सार्य॥ नाराचमुद्रांप्रदर्श्यदिव्यासनंसंशोध्यगुरुंप्रणमेत्॥ अखंडमंडलाकारंव्याप्तंयेनचराचरं
तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः॥ ओंगुरुभ्योनमः॥ ओंपरमगुरुभ्योनमः ओंपरात्परगुरुभ्यो॥ परमेष्ठिगुरुभ्योनमः॥ इतिशि
रसिसंपूज्यदेवंप्रणम्य॥ ओंह्रींइत्युच्चैनेनहुंभुज्ञावर्त्तनाप्रदीपकलिकाकारांब्रह्मपथातनीत्वापरमशिवेनसंयोज्यतयोरै·

कं विभाव्य तदुद्भूतामृतधारया कुलगुरून्संतर्प्य ॥ पुनस्तेनैव मार्गेणाडाकिन्यादिशक्तीः प्रेणावंती कुंडलिनीं स्वपदं प्रापयित्वा वाम
कुक्षौ पापपुरुषं संशुष्कमात्राकारं धूम्रवर्णं ध्यात्वा यं वायुबीजेन षोडशधाजप्तेन शोषयेत् ॥ रं वह्निबीजेन चतुःषष्ट्याजप्तेन दाहये
त् वं वरुणबीजेन द्वात्रिंशद्वारजप्तेन प्लावयेत् ॥ लमिति बीजेन दशधाजप्तेन शरीरं पिंडीभूतं विधाय प्राणप्रतिष्ठां कुर्यादिति भूत
शुद्धिं कुर्यात् ॥ आं ह्रीं क्रों यं रं लं वं शं षं सं हं सोहं सः हंसः मम प्राणा इह प्राणाः २ मम जीव इह स्थितः १२ मम सर्वेंद्रियाणि १२ मम वाङ्म
नश्चक्षुःश्रोत्रजिह्वाप्राणाघ्राणा इहैवागत्य सुखं चिरं तिष्ठन्तु स्वाहा इति प्राणप्रतिष्ठाक्रमः ॥ प्राणान्समर्द प्राणायामं विधाय ३ पूर्ववदाच
म्य संकल्प्य पूर्वं न्यासं कुर्यात् ॥ अस्य श्रीलक्ष्मीनारायणपूजामंत्रस्य शिवऋषिः त्रिष्टुप्छन्दः लक्ष्मीनारायणो देवता ॥ श्रीं बीजं ह्रीं शक्तिः
ॐ कीलकं श्रीभोगापवर्गसिद्ध्यर्थे विनियोगः ॥ शिवऋषये नमः शिरसि त्रिष्टुप्छन्दसे नमो मुखे ॥ लक्ष्मीनारायणो देवतायै नमो
हृदि श्रीं बीजाय नमो गुह्ये ह्रीं शक्तये नमः पादयोः ॥ ॐ कीलकाय नमः सर्वांगेषु इति विन्यस्य षडंगादि कुर्यात् ॥ ॐ ह्रां श्रीं अंगुष्ठाभ्यां न
मः ॥ ॐ ह्रीं श्रीं तर्जनीभ्यां ॥ ॐ हूं श्रूं मध्यमाभ्यां नमः ॥ ॐ हैं श्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं श्रौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः श्रः करतलपृष्ठा

रु·या
९१

म्यांनमः॥अथषडंगः॥ओंह्रांआंहृदयायनमः॥ॐह्रींईंशिरसेस्वाहा ओंह्रूंऊंशिखायैवषट् ओंह्रैंऐंकवचायहुं ओंह्रौंऔंनेत्रेभ्योवौ
षट् ओंह्रःअःअस्त्रायफट्॥अथकरशुद्धिः ओंकामबीजायनमः अंगुष्ठहृदयोः ओंह्रैंजालंधरपीठायनमः तर्जनीशिरसोः ह्सौः पूर्ण
पीठायनमोमध्यमाशिखयोः॥ओंवाराणसीपीठायनमोऽस्त्रायफट् करतलपृष्ठयोः ओंह्रींमधुपुरीपीठायनमोनेत्रेभ्योवौषट्कनि
ष्ठयोः ह्सौः अवंतीपीठायनमः कवचायहुमनामिकयोः॥इतिकरशुद्धिः अंआंइंईंउंऊंऋंॠंवामपादादिगुल्फान्तं॥लृंॡंएंऐंओंऔंअं
अः दक्षपादादिगुल्फान्तं कं ५ गुल्फादिवामपादमूलान्तं चं ५ गुल्फादिदक्षपादमूलान्तं टं ५ नाभ्यादिवामबाहुमूलान्तं तं ५ नाभ्यादि
दक्षबाहुमूलान्तं॥पं ५ कयादिककुदन्तं॥यंलंवंककुदादिवामकर्णान्तं शंषंसंहं ककुदादिदक्षकर्णान्तं॥लंक्षं शिरसपादपर्यन्तं॥इतित्रि
व्यापयेत्॥अंकं ५ ओं अंगुष्ठाभ्यांनमः इंचं ५ ईं तर्जन्यां उंटं ५ ऊं मध्यमास्यां तं ५ एं अनामिका ओंपं ५ औं कनिष्ठिका अंयं १० अः करतल
पृष्ठाभ्यांनमः॥इतिकरन्यासः एवंषडंगन्यासः॥अथमातृकान्यासः॥अंनमःशिरसि आंनमोमुखवृत्ते इं दक्षनेत्रे ईं वामे उं दक्षक
र्णे॥ऊंवामे ऋं दक्षनासापुटे ॠं वामे॥लृं दक्षगण्डे ॡं वामे एं ऊर्ध्वोष्ठे॥ऐं वामे ओं ऊर्ध्वदंतपंक्तौ॥औं अधोदंतपंक्तौ अंनमःशिरसि

राम:
९१

अः नमः मुखे · कं पु इति दक्षबाहुसंधिषु चं पु वामबाहुसंधिषु टं पु वामदक्षपादसंधिषु तं पु वामपादसंधिषु · पं दक्षपार्श्वे · फं वामपा
र्श्वे॥ बं पृष्ठे भं नाभौ मं जठरे यं हृदि रं दक्षांसे लं ककुदि॥ वं वामांसे शं हृदादिदक्षहस्ताग्रांतं॥ षं हृदादिवाम हस्ताग्रांतं सं हृदादि
दक्षपादाग्रांतं॥ हं नमो हृदादिवामपादाग्रांतं लं नमः पादादिशिरःपर्यंतं क्षं नमः शिरसःपादपर्यंतं त्रिर्व्यापयेत्॥ ततः अं ओं अं इति
क्षांतं न्यसेत्॥ अं ह्रीं अं इति क्षांतं मातृकास्थानेषु न्यसेत् अं क्षांतं न्यसेत्॥ अं ह्रीं अं क्षांतं न्यसेत्॥ अं श्रीं अं इति क्षांतं न्यसेत् केवलं मातृका
स्थानेषु मूलं न्यसेदिति षोढान्यासं विधाय॥ मूलमुद्राः देहशुद्धिं कृत्वा घटपूजां कुर्यात्॥ तत्र सामान्यार्घस्य वामे बिंदुषट्कोणवृत्तच
तुरश्रं विलिख्य तत्र पीठेभ्यो नमः इत्यभ्यर्च्य॥ तत्र क्षालितं आधारं संस्थाप्य रं वह्निमंडलाय दशकलात्मने नमः इत्यक्षतैः संपूज्य तत्र श्री
घटं संस्थाप्य शंभुनाच यथा देवि विष्णुना च यथा पुरा॥ ब्रह्मणा यथा पूर्वं तथा त्वां स्थापयाम्यहं॥ इति संस्थाप्य हं अर्कमंडलाय द्वादश
कलात्मने नमः इति गंधपुष्पैरभ्यर्च्य मूलं विलोममातृकापायसामृतेनापूर्य॥ सौः सोममंडलाय षोडशकलात्मने नमः इति संपू
ज्य अस्त्राय फडिति कुलेनद्रव्यं संताड्य मूलमुच्चरन्नासया त्रिर्गंधं ग्रहीयात्॥ तत्र त्रिकोणं विलिख्य मत्तमिष्ठं मूलेन प्रपूज्य॥ ओं

अः नमं मुखे·कं पू इति दक्षवाहुसंधिषु चं पू वामवाहुसंधिषु टं पू वामदक्षपादसंधिषु तं पू वामपादसंधिषु·पं दक्षपार्श्वे·फं वामपा
र्श्वे॥ वं पृष्ठे भं नाभौ मं जठरे यं हृदि रं दक्षांसे लं ककुदि॥ वं वामांसे शं हृदादिदक्षहस्ताग्रांतं॥ षं हृदादिवाम हस्ताग्रांतं सं हृदादि
दक्षपादाग्रांतं॥ हं नमो हृदादिवामपादाग्रांतं लं नमः पादादिशिरःपर्यंतं क्षं नमः शिरसः पादपर्यंतं त्रिर्व्यापयेत्॥ ततः अं ओ अं इति
क्षांतं न्यसेत्॥ अं ह्रीं अं इति क्षांतं मातृकास्थानेषु न्यसेत् अं क्षांतं न्यसेत्॥ अं ह्रीं अं क्षांतं न्यसेत्॥ अं श्रीं अं इति क्षांतं न्यसेत् केवलं मातृका
स्थानेषु मूलं न्यसेदिति षोढान्यासं विधाय॥ मूलमुद्धरन् देहशुद्धिं कृत्वा घटपूजां कुर्यात्॥ तत्र सामान्यार्घस्य वामे विंदु षट्कोण वृत्त च
तुरश्रं विलिख्य तत्र पीठेभ्यो नम इत्यभ्यर्च्य॥ तत्र क्षालिताधारं संस्थाप्य रं वन्हिमंडलाय दशकलात्मने नमः इत्यक्षतैः संपूज्य तत्र श्री
घटं संस्थाप्य शंभुनाथ यथा देवि विष्णुना च यथा पुरा॥ ब्रह्मणा यथा पूर्वं तथा त्वं स्थापयाम्यहं॥ इति संस्थाप्य हं अर्कमंडलाय द्वादश
कलात्मने नम इति गंधपुष्पैरभ्यर्च्य मूलं विलोममातृकापायसामृतेनापूर्य॥ सौः सोममंडलाय षोडशकलात्मने नम इति संपू
ज्य अस्त्राय फडिति कुलेन द्रव्यं संताड्य मूलमुच्चरन्नासयाविंगंधं गं ह्रीं यात्॥ तत्र त्रिकोणं विलिख्य मत्स्यमिस्त्रा मूलेन प्रपूज्य॥ ओं

ह्रां ह्रीं हूं हैं हौं हः सुधेशुक्रशापं मोचय२ अमृतं स्रावय२ स्वाहा इति द्रव्योपरि दशधा संजप्य सूर्यमंडलसंभूते वरुणालयसंभवे ॥ अ
मावीजमये देवि शुक्रशापाद्विमुच्यतां ॥ देवानां प्रणवो बीजं ब्रह्मानंदमयं यदि तेन सत्येन ते देवि ब्रह्महत्यां व्यपोहतु ॥ पावमानः परानं
द पावमानः परो रसः पावमानं परं ज्ञानं तेन त्वां पावयाम्यहं इति त्रिर्जप्त्वा ॥ अआइअसूमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्रावय२
ओं ह्रीं अमृतेश्वैर्यै नमः ॥ इति द्रव्योपरि दशधा जप्त्वा आनंदभैरवभैरव्यौ ध्यात्वा ॥ हसक्षमलवरयूं दशधा जपेत् ॥ ओं सहक्षमलव
रयीं सुधादेव्यै वौषट् इति द्रव्योपरि दशधा जप्त्वा तत्र त्रिकोणं विलिख्य ॥ गंगे चेत्यादिना तीर्थमावाह्य अकारादि षोडश ककारादि तत्र
हंलक्षं विलिख्य मूलं दशधा जप्त्वा गंधपुष्पदूर्वाक्षतैः संपूज्य मीनमुद्रया दीवृशोधयेदिति द्रव्यशुद्धिः ॥ मीनोपरि धेनुयोनिमत्स्यमुद्रः
प्रदर्श्य त्र्यंबकं यजाम मूलं त्रिर्जप्त्वा मांसं शोधयेदिति मीनशुद्धिः ॥ मांसोपरि मुद्रात्रयं प्रदर्श्य प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः
कुचरो गिरिष्ठाः ॥ यस्योरुषु त्रिषु विक्रमणेष्वधिक्षयंति भुवनानि विश्वा ॥ मूलं त्रिर्जप्त्वेति मांसशुद्धिः मुद्रोपरि मुद्रात्रयं प्र
दर्श्य ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं पदं इ

तिमूलंत्रिर्जप्त्वामुद्राखंडमीनमांसादीन्घटेनिक्षिप्यचतुरश्रंविलिख्यस्ववामसाधारंपात्रंगुरोःसंस्थाप्यकुलामृतेनापूर्यमूलेनपूजये
त्॥ततःस्वभोगपात्रंशक्तिपात्रंयोगिनीवीरपात्रंमधुपर्कपात्राणिचसंस्थाप्यकलशामृतेनापूर्यघृतमधुशर्कराभिर्मधुपर्कपात्रं
प्रपूरयेत्॥योगपीठपूजांकुर्यात्बिंदुविभूषणात्रिकोणाविरामसमानवसुकोणामंडितवसुदलविराजितषोडशदलरचितभूत्र
त्रयसंभूषितचतुरश्रश्रीयंत्रराजंविलिख्यवाप्रक्षाल्यश्रीरणीपीठादेनिविश्यहृदिसदेवीकंदेवंमानसोपचारैरभ्यर्च्यवाह्यपूजां
कुर्यात्॥तत्रओंह्रींमंडूकायनमः२कालाग्निरुद्राय२मूलप्रकृत्यै२आधारशक्त्यै२कूर्माय२अनंताय२वराहाय२पृथिव्यै२सु
धार्णवाय२मणिमयमंडपाय२अष्टदिक्षुनवरत्नखंडेभ्यो२सुवर्णपर्वताय२नंदनोद्यानाय२कल्पवनाय२पद्मवनाय२चित्ररत्न
खचितभूमिकायै२चिंतामणिमंडपाय२रत्नसिंहासनाय२उर्द्ध्वेश्वेतछत्राय२पूर्वादिदिक्षु॥धर्मज्ञानवैराग्यैश्वर्येभ्यो२विदि-
क्षु॥अधर्माज्ञानावैराग्यानैश्वर्येभ्यो२सत्वाय२रजसे२तमसे२तत्वेभ्यो२ओंह्रींत्स्कोःमंत्रवर्णभूषितकर्णिकायै२प्रकृतिमयप
त्रेभ्यो२विकृतिमयकेसरेभ्यो२ओंह्रींत्सौःगरुडासनाय२पंचाशद्वर्णभूषितपद्मासनाय२मूलंसर्वतत्वात्मकायश्रीयोगपीठा

त्मनेनमः॥ इतिसंपूज्यदेवंध्यात्वात्रिरंसंपुष्पगर्भितांनिवध्यात्वादेवेशभक्तिसुलभपरिवारसमन्वित॥ यावत्त्वांपूजयिष्यामिता
वद्देवइहावहन्॥ इतिपुष्पांजलिंक्षिप्त्वाआवाहनादिकामुद्राःप्रदर्श्यमूलंसांगसदेवीकंश्रीलक्ष्मीनारायणदेवइहागच्छइहसंतिष्ठ २
इहसन्निधत्स्व ४ मूलं ३ आंह्रींक्रोंहंसलक्ष्मीनारायणप्राणाइहप्राणा लक्ष्मीनारायणजीवइहस्थितः॥ सर्वेन्द्रियाणिवाकमनश्च
क्षुश्श्रोत्रजिह्वाघ्राणाप्राणाइहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा॥ इतिलेलिहानमुद्रयाप्राणान्दत्वामूलेनसदेवीकलक्ष्मीनारायणाइदमा
सनमास्यतां॥ मूलविद्यांतेपाद्याचमनीयमधुपर्काचमनीयार्घ्यगंधाक्षतस्नानालंकाररत्नपीठगंधपुष्पाक्षतधूपदीपनैवेद्याचम
नीयतांबूलछत्रचामरारात्रिकादीन्निवेद्यप्रणम्यमूलेनकलशामृतेनंतत्वमुद्रयासांगंसवाहनंसायुधंसपरिछदंलक्ष्मीनाराय
णंपूजयामितर्पयामिनमः॥ इतित्रिःसंतर्प्यदेवाज्ञामादायसपरिवारदेवताःपूजयेत्॥ पुष्पांजलिंदत्वामूलंमहालक्ष्मीःश्रीपादुकां
पूजयामितर्प्पयामि॥ मूलंराज्यलक्ष्मीश्रीमूलंसिद्धलक्ष्मीश्री॥ इतिबिंदौप्रथमावरणं ३ गंगंगाश्री ३ यंयमुनाश्री ३ संसरस्वतीश्री ३ इति
त्र्यश्रेद्वितीयावरणं॥ ३॥ शंखश्री ३ चक्रश्री ३ गदाश्री ३ पद्मश्री ३ इतिविंदौतृतीयावरणं ३ लक्ष्मीश्री ३ विष्णुश्री॥ लक्ष्मीवासुदेवःश्री

२ लक्ष्मीदामोदरश्री ३ लक्ष्मीनृसिंहश्री ३ लक्ष्मीसंकर्षणाश्री ३ लक्ष्मीसंकर्षणाश्री ३ लक्ष्मीत्रिविक्रमश्री ३ लक्ष्मीअनिरुद्धश्री ३ ल
क्ष्मीविष्वक्सेनश्री लक्ष्मीश्चाद्यं प्रथमं प्राचार्य्य वसुकोणे चतुर्थीवरणां ३ महाभैरवश्री ३ रुरुभैरवश्री ३ चंडभैरवश्री ३ भूतभैरवश्री
३ कालभैरवश्री ३ कपालभैरवश्री ३ भीषणभैरवश्री ३ श्मशानभैरवश्री पा इत्यष्टदलेषु पंचमावरणां ।। ३ असितांगश्री ३ हेसहेतु
श्री ३ वंशीपाशिश्री ३ स्वगुरुश्री ३ परमगुरुश्री ३ परापरगुरुश्री ३ परमेष्ठिगुरुश्री इति वायव्यादीशानान्तं मूलत्रये षष्ठमीवरणां
३ केशवश्री ३ माधवश्री ३ कृष्णश्री ३ गोविंदश्री ३ मधुसूदनश्री ३ गदाधरश्री ३ शांखश्री २ चक्रश्री ३ चतुर्भुजश्री ३ पद्मायुधश्री ३ कैट
भारीश्री ३ घोरदंष्ट्रश्री ३ जनार्दनश्री ३ वैकुंठश्री ३ वामनश्री ३ गरुडध्वजश्री पा ।। इति षोडशदलेषु सप्तमावरणां लं इंद्रश्री ३ रं व
ह्निश्री यं यमश्री क्षं निर्ऋतिश्री वं वरुणश्री पं वायुश्री सं सोमश्री हों मईशानश्री ह्रीं अनंतश्री ह्रां ब्रह्मश्री इत्यभ्यर्च्य चतुरश्रेऽष्टमाव
रणां ३ वज्रश्री ३ शक्तिश्री ३ दंडश्री ३ खड्गश्री ३ पाशश्री ३ यष्टिश्री ३ ध्वजश्री ३ शूलश्री इति बाह्यद्वारचक्रेषु नवमावरणां मूलं त्रिरुच्चार्य
सांगं सवाहनं सायुधं सपरिच्छदं सलक्ष्मीकं लक्ष्मीनारायणं देवं पूजयामि तर्पयामि नमः इति संपूज्य त्रिः संतर्प्य योनिमुद्रया

प्रणमेत् ॥ इति दशमावरणं ॥ ततः पुनर्नैवेद्याचमनीयतांबूलछत्रादीन्निवेद्य देवाग्रे मालां मूलेन संपूज्य यथाशक्त्या मूलं जप्त्वा गु-
ह्यातिगुह्यगोप्त्रीत्वं चेति देवाय जपं समर्प्य तदग्रे कवचसहस्रनामस्तवपाठं कृत्वा तदपि देवीदेवयोः समर्प्य साधकैः सह साधकः
पात्रवंदनं कुर्यात् ॥ यावन्न चलते दृष्टिर्यावन्न चलते मनः तावत्पानं प्रकर्त्तव्यं पशुपानमतः परं इति पूर्णपात्रं हुत्वा शांतिस्तोत्रं पठि-
त्वा पुष्पांजलिं दत्वा नासया पुष्पमाघ्राय करंध्रे सदेवीकं देवं प्रापयित्वा पुनर्हृत्कमलमानीय स्वयमपि लक्ष्मीनारायणविहितधि-
ग्रहो भूत्वा बघ्नतो वैष्णवाचारपरायणाः सुखं विहरेत् इति संहारमुद्रया प्रणमेत् ॥ इति श्रीदेवदेवस्य लक्ष्मीनारायणस्य तंत्रे ॥ पद्ध-
तिर्नित्यपूजाया वर्णिता गोपिता कुरु गुह्यं गोप्यमिदं तत्त्वं पूजासारं महेश्वरि ॥ गोपयेद्दैवस्तवः सत्यमित्याज्ञा परमेश्वरि ॥ ॥ इ-
ति श्रीदेवीरहस्ये तंत्रे लक्ष्मीनारायणनित्यपूजापद्धतिवर्णनं नाम सप्तत्रिंशः पटलः ॥ ३७ ॥ भैरव ॥ अधुना देवि वक्ष्यामि लक्ष्मीना-
रायणस्य ते ॥ कवचं मंत्रगर्भं च वज्रपंजरकाम्यया श्रीवज्रपंजरं नाम कवचं परमाद्भुतं ॥ रहस्यं सर्वदेवानां साधकानां विशेषतः ॥ यं
धृत्वा भगवान्देवः प्रसीदति परः पुमान् ॥ यस्य धारणमात्रेण ब्रह्मा लोकपितामहः ॥ ईश्वरो हं शिवो भीमो वासवो पि दिवस्पतिः ॥ सू-

र्यस्तेजोनिधिर्ईविचंद्रमस्तारकेश्वरः॥ वायुश्चवलवान्लोकेवरुणोयादसांपतिः॥ कुवेरोपिधनाध्यक्षोधर्मराजोयमस्मृतः॥ यंघृ
त्वासहसाविष्णुःसंहरिष्यतिदानवान्॥ जयानरावणादींश्चकिंवक्ष्येहंमतःपरं॥ कवचस्यास्यसुभगेकथितोयंमुनिःशिवः॥ त्रिष्टु
प्छन्दोदेवताचलक्ष्मीनारायणोमतः॥ रमावीजंपराशक्तिःतारंकीलकमीश्वरि॥ भोगापवर्गसिद्ध्यर्थेविनियोगइतिस्मृतः॥ पू
र्णेन्दुवदनंपीतवसनंकमलासनं॥ लक्ष्म्याश्रितंचतुर्वाहुंलक्ष्मीनारायणंभजेत्॥ ओंवासुदेवोवतुमेमस्तकंसशिरोरुहं॥ ह्रींलला
टंसदापातुलक्ष्मीविष्णुःसमंततः॥ ह्स्रौः नेत्रेवताल्लक्ष्मीगोविंदोजगतांपतिः॥ ह्रींनासांसर्वदापातुलक्ष्मीदामोदरःप्रभुः॥ श्रींमुखं
सततंपातुदेवोलक्ष्मीस्त्रिविक्रमः॥ लक्ष्मीकंठंसदापातुदेवोलक्ष्मीजनार्द्दनः॥ अंआंइंईंपातुवक्षोओंलक्ष्मीस्त्रिपुरेश्वरः॥ उंऊंऋंॠं
पातुकुक्षिंह्रींलक्ष्मीगरुडध्वजः॥ लंलृंएंऐंपातुपृष्ठंह्स्रौःलक्ष्मीनृसिंहकः॥ ओंऔंअंअःपातुनाभिंह्रींलक्ष्मीविष्टरश्रवः॥ कंखं
गंघंङंगुह्यंपातुश्रीलक्ष्मीकैटभध्वज॥ चंछंजंझंपातुशिश्नंलक्ष्मीलक्ष्मीश्वरःप्रभुः॥ टंठंडंढंकटिंपातुनारायणायनायकः॥ तंथंदं
धंपातुवोरूनमोलक्ष्मीजगत्पतिः॥ पंफंवंभंपातुजानूओंह्रींलक्ष्मीचतुर्भुजः॥ यंरंलंवंपातुजंघेह्स्रौःलक्ष्मीगदाधरः॥ शंषंसंहंपातुग

ल्मै ह्रीं श्रीं लक्ष्मीरथांगभृत् ॥ लं क्षः पादौ सदा पातु वह्निर्वह्निसखस्तथा ॥ यमो मां दक्षिणे पातु नैरृत्यां निरृतिश्च मां वरुणः पश्चिमे व्या
न्मे वायव्येवतु मां मरुत् ॥ उत्तरे धनदः पायादीशान्यामीश्वरोवतु ॥ वज्रशक्तिं दंड खड्ग पाश यष्टि ध्वजांकिताः ॥ सशूलाः सर्वदा पातु ल
क्ष्मीनारायणः प्रभुः ॥ प्रभाते पातु मां विष्णुर्मध्याह्ने वासुदेवकः ॥ दामोदरोवतात्सायं निशायां नरसिंहकः ॥ संकर्षणोर्धरात्रेव्यात्प्रभाते व्या
त्त्रिविक्रमः ॥ अनिरुद्धः सर्वकालं विष्वक्सेनश्च सर्वतः ॥ रणे राजकुले द्यूते विवादे शत्रुसंकटे ॥ ओं ह्रीं त्रौं ह्रीं श्रीं मूलं लक्ष्मीनारायणोव
तु ॥ ओं ओं ओं रणराजचौरारिभ्यः पायाच्च मां केशवः ह्रीं ह्रीं ह्रां हहहान्सौः हससह सौः वह्नेर्वतात्माधवः ॥ ह्रां ह्रां ह्रीं जलपर्वताग्रभयतः
पायादनंतो विभुः श्रीं श्रीं श्रीं शशशाननं प्रतिदिनं लक्ष्मीधवः पातु मां ॥ ॥ इतिदं कवचं दिव्यं वज्रपंजरकाभिधं ॥ लक्ष्मीनारा
यणस्येष्टं चतुर्वर्गफलप्रदं ॥ सर्वसौभाग्यनिलयं सर्वसारस्वतप्रदं ॥ लक्ष्मीसंवननं तत्वं परमार्थरसायनं ॥ मंत्रगर्भं जगत्सारं र
हस्यं च दिवौकसां ॥ दशवारं पठेद्रात्रौ रतांते वैस्सवोत्तमः ॥ स्वप्ने वरप्रदं पश्येल्लक्ष्मीनारायणं सुधीः ॥ त्रिसंध्यं यः पठेन्नित्यं कवचं म
न्मुखोदितं ॥ स याति परमं धाम श्रीलक्ष्मीवैष्णवोनमः ॥ महाचीनपदस्थोपि यः पठेदात्मचिंतकः ॥ आनंदपूरितः पूर्णो लभेन्मो·

सं साधकः ॥ गंधाष्टकेन विलिखेद्रक्तैर्भूर्जे जपन्मनुं ॥ पीतवस्त्रेन संवेष्ट्य सौवर्णेनाथ वेष्टयेत् ॥ धारयेद्गुटिकां मूर्ध्नि लक्ष्मीना
रायणंस्मरेत् ॥ रणे रिपून्विजित्याशु कल्याणी गृहमाविशेत् ॥ वंध्या वा काकवंध्या वा मृतवत्सा च यांगना ॥ सा वध्नीयात्कंठदे
शे तं लभेत्पुत्रांश्चिरायुषः ॥ गुरूपदेशतो ध्यात्वा गुरुं ध्यात्वा मनुं स्मरेत् त्रिवर्णालक्ष पुरश्चर्याफलमाप्नोति साधकः ॥ कवचेन विना दे
वि कवचस्यास्य पार्वति ॥ विनानेन न सिद्धिः स्यान्मन्त्रस्यास्य महेश्वरि ॥ सर्वागमरहस्याढ्यं तत्त्वात्तत्त्वं परात्परं ॥ अभक्ताय न दातव्यं
कुचैलाय दुरात्मने ॥ दीक्षिताय कुलीनाय स्वशिष्याय महात्मने महाचीनपदस्थाय दातव्यं कवचोत्तमं ॥ गुह्यं गोप्यं महादेवि
लक्ष्मीनारायणप्रियं ॥ वज्रपञ्जरकं वर्म गोपनीयं स्वयोनिवत् ॥ ॥ इति श्रीदेवीरहस्ये तन्त्रे लक्ष्मीनारायणकवचाख्यानं
नामाष्टत्रिंशः पटलः ॥ ३८ ॥ श्रीभैरव उ ॥ अधुना कथयिष्यामि विद्यानामसहस्रकं ॥ भोगदामोक्षदं लोके लक्ष्मीनारायणस्य ते
श्रीदेव्युवाच ॥ भगवन्करुणांभोधे नु लक्ष्मीनारायणस्य मे ॥ भोगापवर्गदं दिव्यं वद नामसहस्रकं ॥ सर्वमंत्रमयं तत्त्वं सर्वपू
जाफलप्रदं ॥ सर्वागमरहस्याढ्यं सर्वदेवैकवंदितं ॥ श्रीभैरव उ ॥ एतद्रहस्यं परमं मंत्रनामसहस्रकं ॥ लक्ष्मीनारायणस्येष्टं

ल॰ना
९६

सर्वस्वं तत्त्वतो मम ॥ गुह्यं गोप्यं तमं देवि सुखदं धर्मवर्धनं ॥ लक्ष्मीसंवर्धनं लोके परत्र परमार्थदं ॥ महाचीनपदस्थानां कौलिकानां
मभीप्सितं ॥ उपपातकपापानां शमनं दमकारणं ॥ सर्वतीर्थफलोडितं सर्वयज्ञफलप्रदं ॥ अवाच्यमार्गहीनानां नास्माभ्यं
दुष्टचेतसां ॥ वैलव कौलिकः श्रेष्ठः पठेन्नामसहस्रकं ॥ गुरूपदेशतो देवि सर्वसिद्धिमवाप्नुयात् ॥ अस्य श्रीलक्ष्मीनारायणसह
स्रस्य शिव ऋषिः त्रिष्टुप्छन्दः श्रीलक्ष्मीनारायणो देवता ॥ श्रीं बीजं ह्रीं शक्तिः ओं कीलकं धर्मार्थकाममोक्षार्थे जपे विनियोगः ॥
ओं लक्ष्मीविष्णुरीशानो लक्ष्मीकान्तो विनायकः ॥ विश्वंभरो विश्वनाथो विश्वसृग्विश्वसूदनः ॥ लक्ष्मीराजो महात्मा च परमात्मा परा
त्परः ॥ अपाराविभवो भव्यो भवभूतिमयो भवः ॥ लक्ष्मीपुष्टो महालक्ष्मीदेवो लक्ष्मीगुणो लक्ष्मीविभावेशुभवान्तकः ॥ लक्ष्मीधरा
धरो लक्ष्मीधीराधरसमद्युतिः ॥ विष्णुर्गो विकलोक्यग्रो विलासी गीतवल्लभः ॥ विद्याधरप्रियो विद्यावादी विद्याविशारदः ॥ पट
भ्रपारलयोटिः पीतपट्टधरो भगः ॥ भाग्यवान्भोगदो भोगी भगुभावविवर्द्धनः ॥ लक्ष्मीकौलेश्वरो लक्ष्मीगुणो लक्ष्मीविभावसुः ॥
लक्ष्मीवीरेश्वरो लक्ष्मीधन्यो लक्ष्मीविभाकरः ॥ अचिन्त्यो नित्यसंयोगी संयमी यमभीतिहृत्तयामित्रीप्रियकरो राहुध्वंसी विष

राम:
९६

पहः॥धीरोभ्रमहरोभीमोभीमास्योभीभवल्लभः॥हारीकंकणाभूषाढ्योमैखलिमान्नूपुरान्वितः॥किंकिणीरवसंतुष्टोवंशीवादनत
तत्परः॥स्थाणुरूपश्चरगतिश्चारुवक्त्रोनपीनयी॥लक्ष्मीविनयवाल्लक्ष्मीजयवाल्ललितागतिः॥लक्ष्मिनेत्रवशीलक्ष्मीहास्यव
श्योविनर्तकः॥नाट्यप्रियोनटानंदीसर्वभृत्सर्वसारभृत्॥ध्यासवोगोप्यमार्गेष्टोवेल्लवाचाररतत्परः॥आत्मापरात्माज्ञानात्माने
काध्यक्षःसुरेश्वरः॥सत्यःस्तुत्यःशुचिर्नित्योनित्यात्मानित्यदर्शनः॥पंचनादमयोनंतःपंचमाचारवल्लभः॥पंचमस्वरसंगी
तःधीर्निधिर्मोहनाशनःलक्ष्मीपुत्रप्रमोल्लक्ष्मीशक्तिभृद्भक्तिभावितः॥लक्ष्मीयोगेश्वरोलक्ष्मीवसुलक्ष्मीमनोहरः॥अचि
न्त्यमहिमाचिन्त्यगरिमाघोरनिःस्वनःसुधीसुखप्रदोदिव्यरूपोदिव्यदेवेश्वरः॥कामदेवोविध्यवेद्योवेदपिहेदनायकःस्रग्रू
पःसामगीतज्ञोयज्ञुज्ञभृतांपतिः॥यज्ञिकोयमिजांचानात्रिलोकजनकोजरःकामप्रदस्वामिवरःकमनीयाकृतिगुरुः॥लक्ष्मी
पृथुवक्षप्रीतोलक्ष्मीश्रीदक्षियःपतिः॥लक्ष्मीकामोलक्ष्मणोशोलक्ष्मीरामोतिसुन्दरः॥अनिवर्णाचनिःसंगोनिर्भयोनिरु
पद्रवः॥निराभासोनिराधारोनिर्लेपोनिरहंकृतिः॥निराश्रयोनिर्गुणाश्चगुणातीतोगणेश्वरः॥ब्रह्मस्वरूपोब्रह्मज्ञोबृहणोवल

वर्द्धनः ॥ महाक्रतुर्यज्ञवपुर्वराहाज्ञामवाहकः ॥ महारुद्रो महादेवो माधवो मधुसूदनः ॥ लक्ष्मीनिरंजनो लक्ष्मीसिद्धिदः सि-
द्धिवर्द्धनः ॥ लक्ष्मीश्रीवत्सवक्षश्च लक्ष्मीकौस्तुभभूषितः ॥ सर्वलोकधरो दान्तो दंतिदंतायुधो दमी ॥ अप्रमेयगतिर्ज्ञानः श-
मी कामी कृतागमः ॥ महाकर्मा महावीर्यो मकारः शिवपूजितः ॥ वाममार्गरतासोड्रिजः सर्वचारैकमध्यगः ॥ मांसाहारी नित्यसंगी
मीनासवरसाकुलः ॥ उडप्रियो रतानंदरतो रतिपतिप्रियः ॥ अघोरदेवो दैत्यारिर्जितदैत्यो दिवाकरः ॥ निशानाथो मतमयो नवग्र-
हः समर्चितः ॥ सत्त्वरूपो विरूपाक्षो विभाकरः शान्तप्रभः ॥ निग्रहो विग्रहो वसो वारानिधिर्निवासकः ॥ पीनबाहुः स्थूलपादो दी-
र्घचक्षुरलंभुजः ॥ यादामनन्तमानीतः सत्यसंधः सनातनः लक्ष्मीसमातनो लक्ष्मीधर्मोध्यक्षोधक्षेश्वरः ॥ लक्ष्मीधनप्रदो लक्ष्मीध-
र्मभागी वधर्मवान् ॥ वीरहा पुण्डरीकाक्षः पद्मनाभो जगत्प्रभुः ॥ पद्मासनो उत्सभयो विस्मयी विगतस्मयः ॥ समानस्समदृष्टिश्च
विषमो विषमेक्षणः ॥ चतुर्मूर्त्तिस्त्रिमूर्त्तिश्च चिंतितार्थश्चिंचिणीयति सहस्रबाहुः क्षत्रंज्ञोत्सरणो वागीशापतिः ॥ सर्वव्यापी स-
र्वभृतः सर्वमध्यगतः सखा ॥ शक्रार्चितो नक्रपतिर्वरुणः शक्रसोदरः ॥ दर्पहा सूर्यशयनः सर्पाशनवरप्रदः ॥ अमानी मानदो-

मान्योमानवेन्द्रोसनुजनमः ॥ मत्तवंशोमराध्यक्षोमलक्ष्योलोकैकरक्षकः ॥ शोकहादुर्गमोहस्तोवलिहाकलिनाशनः ॥ शुभांगोमहिरा
क्षीवःशुभकृच्छोभनाकृतिः ॥ अतिथिस्तिथिनाथश्चनक्षत्रपरिवेशगः ॥ चतुर्भागश्चतुःश्मोत्रोविभ्रमवाविलयप्रदः ॥ प्रलयांतकर
प्राज्ञोमननीजनकप्रियः ॥ यशस्वीश्रीधरःशांतःशंकाशनविनाशकः ॥ अक्रूरवरदःक्रूरःक्रूरवाहुगणनायकः ॥ सुवर्णमकुटो
मारोमारसूर्मणिभूषणः ॥ मांत्रिकोमंजुलोमंत्रीमांत्रिकेष्टवरप्रदः ॥ लक्ष्मीवितर्कवालक्ष्मीसुन्दरोवंधुरोमयः ॥ अजितःसुखि
नस्ताकमलनीयःकांतिवीर्यकः ॥ लक्ष्मीपद्मधरोलक्ष्मीचंडहासोवितर्कनः ॥ लक्ष्मीगोवर्द्धनधरोलक्ष्मीकंजयोविराट् ॥ रक्तलाभ
योरिपुध्वंसीदेवसेनादिनायकः ॥ अतुकसोतुरूलक्ष्मसानुमान्सोमसुंदरः ॥ तामसःसात्विकःसत्यसोमराजोमरीचिमान् ॥ अ
र्चिष्मान्विकलःअल्पःकल्पःसज्जनतूषकः ॥ विराजोवामनोवेणुर्वानरोवारिवाहनः ॥ वाल्मीकिवरदोवंदीवंद्योवंधूकसंनिभः ॥ वर्णो
भ्वःरोवर्णमालीचवनमालोत्रिसुंदरः ॥ भृगुर्भीखक्षुपभीत्राकर्ताहर्ताशतक्रतुः ॥ अनल्पःकोमलकौपीरभगोमणिकुंडलः ॥ लक्ष्मी
केयूरवान्लक्ष्मीमणिहारमविराजितः ॥ लक्ष्मीनूपुरवान्लक्ष्मीमुक्तामाल्यविभूषणः ॥ लक्ष्मीगोधांगुलित्राणोलक्ष्मीसौवर्णिककणः

लक्ष्मीविराजितो लक्ष्मीविविधाभरणोज्वलः ॥ ककारादि क्षकारांत विद्याभूषणभूषितः ॥ अकारादिक्षसमाप्तेश्वनिः ङोपखुरमंडि
तः ॥ वर्णमाल्यो महाविद्यामात्रकाक्षरवत्त्ववान् ॥ लक्ष्मीकामेश्वरो लक्ष्मीकामकीनिर्जरेश्वरः ॥ कलावान्की त्रिमाक्षेमः कुभांडप्र
साहारकः ॥ केशांतकः कालसूक्ष्मकारकः कष्टहारकः ॥ क्षीनः कुब्जः कंबुधरः कंठकंदरकुलालकः ॥ रुन्मध्यक्षः कुलाचारी कुलाकुल
पदार्चितः ॥ कारंजकः कर्त्तरीशः कनकः कर्त्तरीकरः कलंकरहितः कोकः कोकशोकनिवर्हणः ॥ कपिलः कलशी कोलकौलिकाकुलमान
सः ॥ लक्ष्मीकुलो लक्ष्मीकुलजः कर्मवर्द्धनः ॥ लक्ष्मीकामेश्वरो लक्ष्मीनवनाथविनायकः ॥ लक्ष्मीवरिष्ठोनिःपिपो लक्ष्मीयोगदयोग
दः ॥ खर्परः खेचरः खेटः खगगामी खलांतकः खरूपः खगारूपश्च खनित्र ॥ खेतनायकः ॥ खमायुधः खंडधारी खजनेक्षणाभग
नः ॥ खरध्वंसी खराराती खर्वखर्वाकार भीषणः ॥ ङ्खलोलः खगमतिः खेचरेश्वरसेवितः ॥ खेचरीगणसेव्यश्च खंडमुंडानियंत्रितः ॥ ख
ड्गहस्तः खड्गपालः खेटः कवर्णभूषणः ॥ लक्ष्मीकेशः खेकरूपो लक्ष्मीमारस्वमूर्तिमान् ॥ लक्ष्मीखरांगभृल्लक्ष्मीखचरः खाम्भरीत्रि
यः ॥ लक्ष्मीमूर्तिप्रदो लक्ष्मीज्योतिष्मानक्षरांचितः ॥ लक्ष्मीगीतस्वरालापी गोपतिर्गोकुलेश्वरः ॥ गंगाधरप्रियो गोगोष्ठीगोपालो गंधर्वर्ध

नः ॥ गंधवाहप्रियोगीतोगीतिज्ञोगीतनतालसः ॥ गुणाहारप्रियोगंडीगुरुस्कौवाहनोगवः गांभीर्यवान्गुरुतरोगुरुसूक्ष्मधिविवर्धन
गुरुभक्तिप्रियोगोलीगंडुशैलनिवासकः ॥ गर्जज्ञादोगोत्रपतिर्गोलमार्गलमार्गप्रयोगवान् ॥ निसंगोगजवक्रोगणनायकः
नायकः ॥ गंधर्वनाथवरदोगगनेवरपूजितः ॥ गर्भहीनोगर्भवाहीगुणीयोगुणसागरः ॥ गुणातीतनवपुर्गुण्येगुप्तमार्गप्रवर्त्तकः
गुप्तमन्त्रप्रियोगोप्योगुप्तोगुह्यकवल्लभः ॥ गोपितोगिरिनाथश्चगिरिधारीजगन्निधिः ॥ लक्ष्मीप्रियः प्रियः प्रीतोलक्ष्मीगरुडवाहनः
लक्ष्मीकपोतनिलयोलक्ष्मीकल्पद्रुमोरविः ॥ लक्ष्मीसंतानकः सावोलक्ष्मीसारोलतापतिः ॥ लक्ष्मीगुणोऽस्तुलक्ष्माचलक्ष्मीसाग
रःनंदनः ॥ घृणीघृणीमयोघृतोष्णुसुगणार्त्तईश्वरः ॥ घृणामयोघहर्त्ताचघृणिनाथोघृवर्णभाक ॥ लक्ष्मीश्चिंतामणिःसाधु
र्लक्ष्मीरीरवरोन्नमः ॥ लक्ष्मीचतुर्भुजोलक्ष्मीविश्वनाथोविनायकः ॥ ङवर्णोङंतरूपश्चहंगनज्ञोङोणारूपवान् ॥ ङवर्णरूपंविश्व
ओङ्काराक्षरमंडलः ॥ लक्ष्मीसेव्योनिर्गुणात्मालक्ष्मीज्ञानःशिवार्च्चितः ॥ चारुरूपःचारुगतिश्चारुकेशश्चनृपतिः ॥ चिंतावासीचर
यलक्ष्मीनांवरधरोस्तुतः ॥ चारुहासश्चारुदंतःच्यवनःचंडवासितः ॥ श्वंङश्वंङकलानाथःचारुपादश्चतुर्गतिः ॥ चतुरात्माचतुर्थात्मा

चतुर्भूमिधराधरः ॥ चतुःसमुद्रशयनः चतुस्सागरलंघनः ॥ चतुर्युतिश्चतुःशय्याचतुर्वीरवरोवरः ॥ चतुर्वेदमयोवेद्यश्चार्वं
गःचारुभूषणाः ॥ चतुर्वक्त्रः चतुर्वक्त्रपूजितःपरमेश्वरः ॥ चलच्चंद्रकशोभाढ्यःचलन्नुपुरकूजितः ॥ चलदंभोदसदृशश्चलदंभो
जलोचनः ॥ चलदंभोजवदनःचलदंभोदशोभितः ॥ चलत्कनककेयूरःचलत्कांचनकुंडलः ॥ चलत्कनभंगाभःचलत्कनकशे
खरः ॥ चकाररूपश्चारेशःचकारार्थविभूषितः ॥ लक्ष्मीज्ञानोमहादक्षोलक्ष्मीपीतांवरःपवि ॥ छत्रीछत्रधरःछांतःछिन्नमस्ताप्रि
यःप्रियः ॥ छिन्नछेदीछिन्नगुरुःछकाराक्षररूपवान् ॥ लक्ष्मीकांतःकांतियुतोक्षोलक्ष्मीसाधकईश्वरः ॥ जगन्नाथोजगद्भर्ताजग
त्कर्ताजगत्स्थितिः ॥ जगत्क्षयकरोजेताजगतांपतिरुत्तमः ॥ जगत्स्वामीजगद्धाताजगत्संहारकारकः ॥ जीवात्मापरमात्माचजगद्भू
तिप्रदोभवः ॥ जगद्गुरुर्जगत्तुल्योजगदानंददायकः ॥ जगत्संतापभूतात्माजगत्क्रोधदयान्वितः ॥ जगद्दीप्तिकरोवेदोपासितो
जगदीश्वरः ॥ जवीजवान्वितोजातोजगदाडंभरप्रदः ॥ जगत्सेव्योजगत्प्रीतोजगदिष्टोजगन्मयः ॥ जंभनोजदिलोजीवोजंभाराति
वरप्रदः ॥ जामाताजलधेर्गीताजटामुकुटमंडितः ॥ जितारिर्जयदोजेयोजयकृठारतापनः ॥ लक्ष्मीकुचतटगामीनोलक्ष्मीनयनगोच

रः ऋक्षबीजो नृक्मतो ऋं ह्रीं ऋं ह्रीं ह्रां ठ प्रतापनः ॥ ऋंकारी ऋंकृतिर्ऋंह्री रवेऽङ्कारिनृपुरः ॥ लक्ष्मीवरो महालक्ष्मीसेवितो देवचंद्रिनः
ऌंकारो ऽसाल्लीसे शोभवर्णा म्रजरूपवान् ॥ लक्ष्मीस्वभूः स्वर्गगतिर्लक्ष्मीवंद्यो विधुंतुदः ॥ टांकारो टांकहस्तश्च टांतो टांकारकं जितः
लक्ष्मीदेवो देवो लक्ष्मीदेतः कृपानिधिः ॥ ठक्कारो ठक्कुको ठाक्षोः वर्णसुप्रमानिधिः ॥ लक्ष्मी विघूर्णितकोक्षो वैनतेयध्वजो भगः ॥ डम
रुड्डामरो डालो डुकारो मूर्धक्षरसंयुतः ॥ लक्ष्मीपतिः पीवरांगो लक्ष्मीनायकनायकः ॥ ढकारवान् ढक्कभेदी ढकासुरनिसूदनः ॥ ल
क्ष्मीजेता जयकरो लक्ष्मीशीलस्वमूर्धजः ॥ लक्ष्मीजगत्स्थितिर्लक्ष्मीशौरिर्लक्ष्मीगदाधरः ॥ णांतो णावर्णको णोऽङ्गो णावर्णीमनसाधि
नः ॥ लक्ष्मीदामोदरो लक्ष्मीप्राणो लक्ष्मीरथांगभृत् ॥ तुल्यो तुल्यो महातुल्यस्त्रिजगत्सारवर्णमंडितः ॥ तोऽतलो ऽतलसीनाथः तंत्रज्ञो मं
त्रनायकः ॥ तपः फलप्रदस्तांत्रहरूपो तुल्यपराक्रमः ॥ तरिरूपस्तुदिग्जातितस्तपस्वी तापसप्रियः ॥ तुहिनांशुस्तुहिनजस्तुषारकरशो
भितः ॥ तरीसेवास्तुलामस्थ तकाराक्षरमंडलः ॥ लक्ष्मीशंखायुधो लक्ष्मीनंदको रविवर्णभृत् ॥ स्थविरः स्थूलगात्रश्च स्थाणुसेव्योथ
शब्दकृत् ॥ स्थालीरसप्रियो स्थूलः थकारेश्वर ईश्वरः ॥ लक्ष्मीजीवेश्वरो लक्ष्मीधरो लक्ष्मीनृसिंहकः ॥ दयावान् भूपतिर्दक्षो ऽद्भुतो दंभवि

तु·या
१००

र्ज्जित ॥ दारिद्रहा दुःखहर्त्ता दौर्भाग्यक्षयकृद्दयी ॥ दीनोद्दीनप्रमुदंभी दयितोदयवांछकः ॥ दानकृद्दानफलदोदत्तजेतुक्षयंकरः
दानप्रियोदीर्घनखोदुष्टासुरनिषूदनः ॥ देवदेवोयज्ञोवंद्योदकारसुरमंडितः ॥ लक्ष्मीदयाकरोलक्ष्मीदेवोलक्ष्मीदयानिधिः ॥ ध
नदोधनकृद्धन्योधनदेशोधनप्रदः ॥ ध्युतिमान्धर्मबान्धवोधर्मकर्मविचक्षणः ॥ धर्माध्यक्षोधनाध्यक्षोधवलोधीरबान्धवो ॥ धी
रोधैर्यकरोधर्मदक्षोधनदपूजितः ॥ लक्ष्मीधवोमहालक्ष्मीधवोलक्ष्मीमनोभवः ॥ नवीनोनूतनोनम्रोनटोनटोचितः ॥
नागोनागनगश्रेष्ठोनगस्थनागमंडलः ॥ नृसिंहोनरवरोनंतोनरायणोनरः ॥ नागराजोनागपतिर्नागांतकध्वजोनलः ॥ ना
गारूढोनिम्ननाभिर्मंदिसेव्योनटेश्वरः ॥ नलिनाक्षोनरवंद्योपिनायकोनागनायकः ॥ नर्मदातीरक्रीडाकृन्नलिनीपतिलोचन
नरेशोनृपपूज्यश्चनागशायीनगोत्तमः ॥ नारायणोनिष्कलंकोनववर्णाकृतिरात्मवान् ॥ लक्ष्मीनागोनगधरोलक्ष्मीदायोनृ
रूपवान् ॥ पुष्पप्रियःपुष्पःशय्याशयानःपुष्पशेखरःपुष्पदत्वाप्रद्युम्नश्चपुष्पेषुःपुष्पपूजितःपूज्यपवित्रंपरमंपरमे
ष्ठिपितामहः ॥ परंपदंपरंपरांपरमायुःपरात्परःपारावारसुनामर्त्तापरमेशःपरंमहः ॥ पराप्यदःपापहृत्पवनःपरागागम

राम:
१००

पूजितः पराणावृस्रभः पीनः पीनवक्षो जितेंद्रिय ॥ पीतमालः पीनवासः पीनवर्णः पराङ्कुश ॥ पथगो विश्रुत पंथः पाथिक
पांततो घन ॥ पूर्वपौरजनैस्तुत्यः पवर्गो स्वर्णमंडलः ॥ लक्ष्मी पीतांवरो लक्ष्मीलक्ष्मीलक्ष्मी परात्परः ॥ फलं फलि वरफीनः फ
न्नक्तफलदः फली ॥ फिणिशय्याशयानश्च फलाधारा न्नतसंहन ॥ वालको वृद्धिमान्वैयो वैवेभुर्वैय वईश्वर ॥ लक्ष्मीवंधुर्मल
लक्ष्मीवांधवो लक्षणान्वितः ॥ मदपदो मास्वरांगो मास्वरो मातुरव्ययः ॥ मातिध्निर्भगवद्वान्भीतो भीतिहा भयदस्यक ॥ लक्ष्मीम
यहरी लक्ष्मीमयदो भययातन ॥ महेश्वरो महामान्यो महात्मा व्योमनो रम ॥ मनोहारी महातेशांतो महातेजा मनोजव ॥ महो
त्साही माधवश्च मायाधारी मनोन्मन ॥ दानदो खुर्यातीवमानवेस्रूफलप्रद ॥ मदिरामोदसंदितो मारमोहविवर्जितः ॥ लक्ष्मीम
नोदयो लक्ष्मीमान्यो लक्ष्मीमदालसः ॥ यज्ञोदानंदनो पातो यज्ञस्त्रीयोध सैनिकः ॥ यसोधरो यमो योगी योगिनां योगदायक ॥ यो
गेन्द्रो योगपूज्यश्च पादयोपादवेश्वर ॥ यज्ञश्रोतो यज्ञनिधिः याजको याज्ञिवः प्रिय ॥ यज्वा यज्वायज्ञोज्ञातो पकाराक्षसरूपवान् ॥ ल
क्ष्मी यज्ञकरो लक्ष्मीयाज्ञिको यज्ञसेवि ॥ राजारमापतिर्देवो रामो राजा रजोरज ॥ रजसो रात्रि कृडामो रामानंदप्रदायक ॥ रेवतीरम

स्तु·या
१०१

रोगो राकापतिः ॥ सर्वकलाधरः ॥ लक्ष्मीरामो महालक्ष्मीराजा लक्ष्मीत्रिविक्रमः ॥ लाक्षारङ्गो लीनरक्षो ललजिह्वो ललनापतिः ॥ लंके-
शो लास्यको लांतोल चोदरप्रियापरः ॥ लक्ष्मीहीनो लिखवर्णा यलकाराकार ईश्वरः ॥ वार्त दोवीरसेनानी वराहो विग्रहो विराट् ॥ विश्वुर्देस-
श्वरानाथो वसुदेवो वसुधाधिपः ॥ वागीश्वरो वेणुहस्तो चेतालो विरसो वियत् ॥ विद्यानिवासो नयनो विकारो विकृतिः प्रमान् ॥ वितर्की
विनयी विद्याराजमान्यो विचारकः ॥ वाग्मी वानीरमूलस्थो वाचाटो वीरनायकः ॥ लक्ष्मीवराहो वीरेशो लक्ष्मीशो वनेचरः ॥ शंकरः श्रीध-
र श्रीलः श्रमी शीतांशुः शीतलः ॥ शशिमौलिः शरन्नागः शम्भुः शरवनिसूदनः ॥ शक्रः शङ्खः क्षपकरः शत्रुकालकः शिवः ॥ लक्ष्मीशिवः
श्रीपतिः श्रीवरो लक्ष्मीशिवप्रदः ॥ षोडशाखररूपश्च षोडशार्णविभूषणः ॥ षडंगविद्यावेत्ता च षट्कारस्वरशोभितः ॥ लक्ष्मीषडंग-
धारी च लक्ष्मीषोडशवर्णाभृत् ॥ सुंदरः स्वर्गवसतिः सर्वज्ञः सर्वतोमुखः ॥ सदासप्तिः सदाचारः साधुः साधुजनप्रियः ॥ सरलः स-
रलसारः सुखी सुखविवर्धनः ॥ सप्तद्वीपवती नाथः सप्तसागरनायकः ॥ सप्तस्वरमयः सप्तपातालतलवासकः ॥ सात्विकः सत्वसं-
पन्नः समस्तगुणनायकः ॥ समस्तदुष्टविध्वंसी समस्तसुरयातनः ॥ समस्तपातकध्वंसी समस्तसुरवंदितः ॥ लक्ष्मीसनातनो ल-

रामः
१०१

श्रीसनकः साध्यपूजितः ॥ हरिर्हरो हरिहरो हरकेशो हृदायरः ॥ हरिद्रवर्णो हसितो हारी हरिनलोचनः ॥ लक्ष्मीहरिर्हृषीकेशो लक्ष्मी
नाथो नयः ॥ क्षमी क्षमापतिः क्षान्तः क्षमेशः क्षरवर्णभाक् क्षणा क्ष्मस्तारानाथ क्षमावान् क्षुभितासुरः ॥ लक्ष्मीक्षमायुतो ल
क्ष्मीक्षवर्णभृत् ॥ अनन्तोनन्दिपूज्यश्च श्यादित्यसन्निभः ॥ इंद्रिरावल्लभोदेव ईश्वरश्चोग्ररूपवान् ॥ दुष्टोज्वलोपि ज्वालाहज्वला
रोज्वलमातृकः ॥ स्ववर्णावर्णोल्काराद्यनवर्णासमन्वितः ॥ ऐश्वर्यसहितश्चैव श्वेतश्चैवानन्तस्वरार्चितः ॥ ॐ ह्रीं क्लैंः ह्रीं श्रीं देवो लक्ष्मीना
थयतः श्रिवः ॥ १००० ॥ इति मंत्रमयं नाम्नो सहस्रं तत्त्वमुत्तमं ॥ अकारादिक्षकारान्तविद्यानिलय ईश्वरि ॥ सर्वतीर्थमयं सर्वदेव
दानवपूजितं ॥ अश्वमेधसहस्राणि वाजपेयस्य कोटय ॥ चान्द्रायणसहस्राणि युतं देवि महादानान्यनेकशः ॥ मंत्रनामसहस्रस्य कलां
नार्हन्ति षोडशीं ॥ अर्धरात्रे पठेद्दारः शक्तिवक्षस्थितः शनैः ॥ स्वप्ने लक्ष्मीप्रियं देवि वरदं सोपि पश्यति ॥ महाचीनाचरं कृत्वा पठे
द्दारार्चने सकृन्नरः ॥ शतवर्षसहस्राणि पूजायाः फलमाप्नुयात् ॥ एकवारं पठेद्यस्तु संध्याजागरसंनिधौ ॥ सभवेत्साधकः श्रीमान्म
खत्रिदिवं व्रजेत् ॥ पुण्यदं वरदं नित्यं तीर्थसाधनमुत्तमं ॥ योगिनां योगदं पुण्यं भोगिनां भोगवर्द्धनं ॥ रोगिणां रोगशमनं सर्वदु

ष्कृतनाशनं॥ वैष्णवानांप्रियतरंमुक्तानांपरमार्थदं॥ अदातव्यमभक्ताय नव्यमन्यशिष्याय पार्वति विनादानंनगृह्णीयान्नदद्याद्दक्षि
णांविना॥ दत्वागृहीत्वातूभयोःसिद्धिहानिर्भवेद्ध्रुवं॥ इदंनामसहस्रंतुलक्ष्मीनारायणस्यते॥ नवभक्त्यामयाख्यातंगोपनीयंस्व
योनिवत्॥ ॥इतिश्रीदेवीरहस्येतन्त्रेलक्ष्मीनारायणसहस्रनामाख्यानंनामैकोनचत्वारिंशःपटलः॥ ३९॥ श्रीभैरवः॥ अथा
हंतत्वसर्वस्वंरहस्यंपरमार्थदं॥ मंत्रकोशंप्रवक्ष्यामिलक्ष्मीनारायणा स्यते॥ पंचमांगंमहादेविपरमार्थप्रकाशकं॥ चतुर्वर्गस
मुत्थंभोगमोक्षैककारणं॥ गुह्याद्गुह्यतरंतत्वंमंत्रराजस्यपार्वति॥ कौलिकानांसदासंविदानंदरसकारणं॥ अस्यश्रीलक्ष्मीनाराय
णस्यस्तोत्रमंत्रस्यशिवऋषिः त्रिष्टुपछन्दः श्रीलक्ष्मीनारायणोदेवता॥ श्रीं बीजं ह्रीं शक्तिः ऐं कीलकं भोगापवर्गसिध्यर्थेस्तवपा
ठेविनियोगः॥ पूर्णेन्दुवदनंपीतवसनंकमलासनं॥ लक्ष्म्याश्रितंचतुर्बाहुंलक्ष्मीनारायणंभजे॥ १॥ किरीटिनंकुंडलहारमंडितंप
द्मासनंश्याममसुरंचतुर्भुजं॥ पीताम्बरंशंखगदाब्जचक्रपाणिंपरात्परंपुरुषंभजेविभुं॥ २॥ प्रणवंयदिमानवीजयेद्धरियात्तंवुज
सेवनाकुलः॥ धनुर्ज्ञानकधामयातिनूनंपरमानंदमयोगतस्मयः॥ ३॥ पराबीजंतुतंयदिजपतिजतुर्जयस्थविस्मराज्ञानः॥ स्म

नागमकुटिलमार्गोज्ज्ञानमयः ॥ भवेत्कौलेशानः सकलरिपुदावाग्निजलदः सुवस्त्रीभिः सार्द्धं सुरविटपिवाटीभ्रमते ॥ ४
त्रिवीजं यो महामंत्रं जपेदानंदनिर्भरः ॥ आनंदरूपो भविता लक्ष्मीनारायणप्रियः ॥ ५ ॥ विभूतिवीजं मनुराजतत्वं जपेद्रतांते यदि
कौलकेन्द्रः ॥ स याति देवासुरपूजितांघ्रिः परं पदं सर्वसुरैरलभ्यं ॥ ६ ॥ मावीजमंत्रः परमार्थतत्वं सत्वैकरूपं मनसा जपेद्यः स
कामिनीकामरत्नाप्रवीरोगोभवेदङ्गरीरासुहृद्दर्प्पहारी ॥ ७ ॥ रमावीजं नामासरपदमयं मंत्रमतुलं जपेद्यो यत्नाग्रे हरिचरणाप
र्पितमनाः ॥ भवेद्भूभृन्मौलिस्फुरितमणिमालीनिवहतः ॥ प्रभाभास्वत्पादः सधरणीधरेन्द्रो विजयवान् ॥ ८ ॥ नारायणायेति
जपेति जपेन्मनुं यो रात्रौ प्रभाते परमार्थवीजं ॥ स वैरिदावानलवारिवाहो भवेत्सर्गीभिः गुरुगर्वहारी ॥ ९ ॥ विश्वं जपेद्यो यदि वि
श्वसारं विश्वंभरध्यानपरः प्रभाते ॥ साम्राज्यलक्ष्मीसरिपून्विजित्य लभेद्दिवि स्वर्गमतः परत्र ॥ १० ॥ वज्ररभ्ररक्तयोह ज्ञारवक्षप
त्रांचितकामस्य स्वविश्वे ॥ कमलाश्रितमीश्वरं निविष्टं प्रपरानंदमयं भजाम्यनंतं ॥ ११ ॥ इति मंत्रमयं पठेत्स्तवं यो हरिनारायणाव
ल्लभ प्रभाते ॥ कमला विमला ज्ञायस्य तस्य श्रीतिशीलस्य वशी भविष्यति ॥ १२ ॥ इतीदं स्तोत्रमीशानि मूलमंत्रमयं परं ॥ नवमन्त्रा

रु॰या
१०३

मयाख्यातं मन्त्ररत्नेयं मुमुक्षुभिः ॥ पंचांगमिदमाख्यातं लक्ष्मीनारायणस्य ते ॥ वर्णितं गोप्यमत्यर्थं गोपनीयं स्वयोनिवत् ॥ श्रीदेव्यु-
वाच ॥ भगवन्सर्वतत्त्वज्ञ सर्वलोकहितेरत ॥ श्रितास्मि तव भावेन कथनेनास्य शंकर ॥ लक्ष्मीनारायणस्यादाश्रुत्वा पंचांगमुत्तमं
मया प्तः परमानन्दो नाथाहं ते ब्रवीमि किं ॥ भैरव ॥ एतद्रहस्यमखिलं सर्वतंत्रेषु गोपितं ॥ वेदागमालीमचंद्राभ्र देवि ते कथितं म-
या ॥ देवानां दुर्लभं मंत्रं तत्त्वं पंचांगवैभवार्चितं ॥ रहस्यं सर्वलोकानां सर्वस्वं मम पार्वति ॥ अप्रकाश्यमवक्तव्यमदातव्यं दुरात्मने ॥ देयं
शिष्याय शांताय गुरुभक्तिरताय च ॥ दानशीलाय भक्ताय कौलमार्गरताय च ॥ महाचीनपदस्थाय वैष्णवाय महात्मने ॥ दत्वा मुक्ति-
लभेद्देवि भक्तानां सिद्धिदायिनां ॥ इतीदं परमं तत्त्वं तत्त्वातत्त्वं परात्परं ॥ गोप्यं गुह्यं गोपनीयं इत्याज्ञायारमेश्वरि ॥ ॥ इ-
ति श्रीरुद्रयामले तंत्रे लक्ष्मीनारायणस्तवाख्यानं नाम चत्वारिंशः पटलः ॥ ४० ॥ लक्ष्मीनारायणपंचांगं संपूर्णं ॥ ॥ औं नमः
शिवाय ॥ कैलासशिखरे रम्ये मणिमालीनिभास्वरे ॥ नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥ विचित्ररत्नखचितशिलामंडप-
मंडिते ॥ किन्नरीमधुरालापमुखरीकृतदिङ्मुखे ॥ भगवतमुमानाथमुपविष्टमुपाश्रितं ॥ बलिदीपैरुच्चकर्पूरगुग्गुलसमन्वितं

राम:
१०३

वर्मं षेवस्तु सिद्धौघगणा गंधर्वसेवितं ॥ चंद्रार्धमुकुटोपेतं शूलखट्वांगधारिणं ॥ वराभयक्षमालांकुशवाणसमंयुतं ॥ खड्गखेटक
हस्तं च पञ्चनेत्रं मरकतप्रभं ॥ भिंडिपालं च पाशं च परिशुतधारिणं ॥ वराभयगदांकुशं महस्तं चन्द्रहैमान्तं ग्रीवं च संयुतं ॥ अ
घोरास्त्रं जयेद्वस्तु भूतिभूषितविग्रहं ॥ द्विजवरं विज्ञा लाक्षत्रिनेत्रं पञ्चवक्त्रकं ॥ आनन्दमुदितं विश्वं विश्वनायकमीश्वरं ॥ ज
यंतं प्रहसंतं च योगेर्याभिर्लिंगितविग्रहं ॥ पन्नगाभरणोपेतं महादेवं सुरेश्वरं ॥ वरदं पद्मासनं शुभ्रं शरणागतवत्सलं ॥ प्रसन्न
वदनं हृष्टं परात्परं ध्यायेत्पार्वतीं ॥ शिरामध्ये योगीश्वरीप्रोक्ताच परमेश्वर ॥ श्रीदेव्युवाच ॥ भगवन्यः शिवो देवो महाधामं जयप्र
आदिनाथो जगत्त्राता दीक्षानायक ईश्वरः ॥ वर्णितं तु त्वया महादेव गुणानामब्धिदीश्वर ॥ भवता नाथ्यदेवस्य पञ्चवक्त्रस्वरूपि
णः पंचानां श्रोतुमिच्छामि वक्तुमर्हसि मे विभो ॥ श्रीभैरव उवाच ॥ परमेश्वरदेवस्य महानन्देश्वरस्य ते ॥ भक्त्या वक्ष्यामि पंचानां न
ध्येयं यथ स्वकार्यवित् ॥ पञ्चवक्त्रतिवर्णमन्त्रेन नमस्कृतं ॥ स्तोत्रमन्त्रागमभूतं च योगाय येश्वरसाधकः ॥ तत्रादौ पञ्चवक्त्रे
दीक्षानायकवल्लभं ॥ गुह्यात्परमगुह्यं च मोक्षवं च भुक्तिमुक्तिदं ॥ मंत्रोद्धारं महादेवि दीक्षाकालविधि ध्रुवे ॥ दिव्यं सुखकरं

साध्यं सिद्धं वक्ष्यामि सिद्धये ॥ तारं हृज्जां च नार्त्तिके शिवश्चारमंइकबीजं ततो वाच्यं पालय पालयेति च पुनः शक्तिः शिवः शान्ति
कं ॥ हृज्जं तारवामस्य वर्णा निगदितस्तव भक्तिहेतोर्मया ॥ दीक्षाधानामकवल्लभो मन्त्रयं त्रैलोक्यचिन्तामणिः ॥ नास्त्यंतराराय वा
कुल्यं सिद्धसाध्यारिहृषणं ॥ भक्त्या यत्नेन दौर्बल्यं नाचारनियमभ्रमन पंचदोषप्रशान्तापिनेष्ट मर्णाधमर्णको ॥ केवलं परम
नदवक्ष्नो रिपुमर्दनः सत्योयं मंत्रराजेन्द्रो दीक्षाफलसुरद्रुमः ॥ विना पुरश्चर्यामेव मंत्रराजो न सिध्यति तस्मात्पुरश्चर्या
हेतोर्गुरुं संप्रार्थ्य यद्विवे ॥ गुरुरूपेन यः कुर्यान्मंत्रस्यास्य पुरश्चर्यां ॥ तस्यायं मंत्रराजेन्द्रो भवेत्कल्पद्रुमोपमः ॥ वर्षालक्षं पुरश्चर्या
तदर्द्धं वा महत्तमेश्वरि ॥ स्वफलस्यावधिं कुर्यान्नातो न्यूनं कदाचन ॥ जपाद्दशांशतो होमस्तद्दशांशेन तर्पणं ॥ मार्जनं तद्दशांशे
न तद्दशांशेन भोजनं ॥ एवं विधाय मन्त्रस्य पुरश्चर्यां च साधकः ॥ गुरवे दक्षिणां दत्त्वा यथाविभवमीश्वरि ॥ ततो जयेन्महादेवि
सर्वसिद्धिप्रदायकः ॥ अन्यथा न भवेत्सिद्धिर्दीक्षायाः समनोरपि ॥ यन्त्रोद्धारविधिं वक्ष्ये देवदेवस्य पार्वति ॥ सर्वसंमोहनं
दिव्यं सर्वाशापरिपूरकं बिन्दुत्रिकोणषट्कोणाष्टदलमंडिते ॥ वृत्तत्रयं धरासद्मभिन्नं च शिवमीरितं ॥ लयांगमस्य वक्ष्या

मिमंत्रराजस्य पार्वति ॥ यस्य श्रवणमात्रेण दीक्षाफलमवाप्नुयात् ॥ इंद्राद्यादशदिक्पालाः सायुधा भूगृहे शिवे ॥ दिव्यसिद्धौघ
मानौघाः गुरवोप्यारणा शिवेत्र येअसितांगो रुरुश्चंडो क्रोधोन्मत्तो भैरवः ॥ कपालेशो भूषणाख्यः संहारश्चाष्टमः शिवे पूज-
नीयो वसुदले साधकैः सुमञ्जुभिः ॥ कालाग्निरुद्रनेत्रेशं विश्वनाथं महेश्वरं ॥ सद्योजातं वामदेवं पूजयेन्कामयोनिषु ॥ कामे-
श्वरं महाकालं देवस्वछंदभैरवं त्रिकोणे पूजयेद्विस्वायेशानाग्निभागतः ॥ विंदौ मृत्युंजयं देवं शक्त्या सहितं शिवे ॥ अमृते-
श्वरमीशानमीश्वरं भुवनेश्वरं ॥ त्रिखंडापाशमीशानि सुधाकलशमुत्तमं ॥ सुकाक्षसूत्रं देवाग्रे पूजयेत्साधकोत्तम ॥ संपूज्य
विधिवद्देवि गंधाक्षतप्रसूनैः ॥ धूपदीपादिनैवेद्यैस्तांबूलच्छत्रचामरैः ॥ अयांगमिदमाख्यातं सर्वतंत्रेषु गोपितं ॥ सर्वसिद्धि-
प्रदं देवि गोपनीयं विशेषतः ॥ मंत्रस्यास्य महादेवि महानागमपदादिकं ॥ सकलोत्र ऋषिः छन्दो गायत्री देवता तथा ॥ महामृत्यु-
जयो रुद्रो महादेवोधिदेवता ॥ बीजं च प्रणवो देवि शक्तिर्लज्जाख्यबीजकं ॥ कीलकं शरमीशानि दिग्बंधोस्य स्तुमीश्वरि ॥ चतुर्वर्गेषु
विद्यानां विनियोगः प्रकीर्तितः ॥ तारं हृन्मंत्रशरह्रींजेव्यंत दीर्घैः षडंगमाचरेत् ॥ करयोर्हृदयादीनां मंगानां साधकोत्तमः ॥ मूलादि

वीजमात्रेणाप्राणायामत्रयं चरेत् ॥ तत्त्वत्रयेणाचमनमात्मविद्याशिवादिना ॥ अथ ध्यानं प्रवक्ष्यामि देवदेवस्य पार्वति ॥ येनैव ध्यान-
मात्रेण मंत्री रौद्रं पदं व्रजेत् ॥ चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मस्यांतस्थितं ॥ मुद्रापाशसुधाक्षसूत्रविलसत्पाणिं हिमांशुप्रभं
कोटीचन्द्रगलत्सुधाप्लुततनुं हारादिभूषोज्वलं ॥ कांत्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये ॥ चंद्रमण्डलमध्यस्थे रुद्रवाले वि-
चिन्त्यते ॥ तत्रस्थं चिंतयेत्साध्यं मृत्युंजाप्योपि जीवति ॥ इति साध्यं परावीजमंत्राक्षयवभूषितं ॥ रुद्रवालस्य मीशानि गोपनीयं विशे-
षतः ॥ प्रयोगानथ वक्ष्यामि दुर्लभान्परमार्थदान् ॥ यान्विधाय शिवे मंत्री भवेदीश्वरसंनिभः ॥ स्तंभनं मोहनं चैव मारणाकर्षणौ ततः
वशीकारं तथोच्चाटं शांतिकं पौष्टिकं ततः ॥ एतेषां साधनं वक्ष्ये सर्वसौख्यकारणं ॥ येन साधनमात्रेण सर्वसिद्धिर्भवेन्नृणां ॥ रवौ
स्नात्वा शिवे कृत्वा नित्यकर्म समाप्य च ॥ संकल्प्य पूर्वं मंत्रस्य जपेदयुतसंख्यया ॥ होमो दशांशतः सर्पिर्यवाकनकवीजकैः ॥ स्तंभ-
नं ध्यायते वा विमुखस्य स्तुतिवस्तंभनं चंडे संपूज्य देवेशं जपेदयुतसंख्यया ॥ होमो घृतयवालाजाशाकपत्रैर्दशांशतः ॥ तद्भस्म ति-
लकेनैव मोहनं जगतां भवेत् ॥ ४ ॥ मंगले साधकः स्नात्वा गत्वा श्मशानमतुलं ॥ अयुतं प्रजपेन्मंत्रं ॥ होमो घृतविशालयाग्नौ प

र्तो मधुकोकिलैः श्रीफलैः चिंचिनीफलैः ॥ मृत्युं याति रिपुं देवि सत्यं सत्यमसंशयम ॥ ३ ॥ उपेतत्गार्च्वयेद्देवि श्वश्रीवृक्षकाष्ठेज्ञयेन्मनुं
अयुतं तद्दशांशेन हुनेत्सर्पिः शतावरीं ॥ त्रिकंटकं बिल्वकं च स्त्रीणामाकर्षणं भवेत् ॥ ४ ॥ गृहेस्नात्वा जपेद्विद्यां परामयुतसं
ख्यया ॥ होमो दशांशतः कार्यो घृतपद्माक्षचन्दनैः ॥ आराध्य देवताया यावत्यामन्तयच्छिवे ॥ रिपुराजाधमीवीरोजितश्चदास
त्वमेष्यति । पमुत्रेत्शुश्मशाने वीरेत्मूजांजपेदयुतसंख्यया ॥ चितायां मूलविद्यां तु नह दशांशं हुनेत्घृतं ॥ समं हवं सशांभूके विषमु
ष्वाप्येध्रुवं ॥ ६ शनौ लावाज्वरेत्मूजांजपेदयुतसंख्या द्विधां तथायुतं ॥ हुनेदाज्यपयोमृत्वा दातीकमहुलानृ ॥ धर्मारुपुष्पस
हितान्सर्वशांति प्रजायते ॥ ७ ॥ सर्वदा सर्ववारेषु जपेदयुतसंख्यया ॥ होमो दशांशतः कार्यो घृतपायससर्कोपंकजे ॥ छागेनमृ
र्भवारान्हपलयुग्मैः समन्वितैः ॥ ८ ॥ पितृणां देवतानां च भूभृतां रोगिणां तथा ॥ दशांशं विधिवद्दत्वा महापुष्टिः प्रजायते ॥ ९ ॥ इ
तीदं परमं तत्वं मन्त्रस्यास्य मयेरितं ॥ अप्रदातव्यमभक्तेभ्यो गोपनीयं स्वयोनिवत् ॥ ॥ इति श्रीदेवीरहस्ये तन्त्रे मृत्युंजयप
टलो नाम एकचत्वारिंशः पटलः ॥ ४१ ॥ श्रीभैरवः ॥ अथातो देवि वक्ष्यामि पूजापद्धतिमुत्तमां ॥ गणपस्य महादेवि श्रांवोटिय जप

रु॰या
१०६

फलप्रदं॥ प्रातःकृत्यमकृत्वातुयःशिवंभक्तितोर्चयेत्॥ तस्यपूजातुविफलाशौचहीनायथाक्रिया॥ ब्राह्मेमुहूर्त्तेचोत्थायब
द्धपद्मासनःस्वशिर॥स्थसहस्राराधोमुखकमलकर्णिकांतर्गतंनिजगुरुंध्यायेत्॥ श्रीगुरुंपरमानंदंदेहस्थानंदविग्रहं॥ यस्य
संनिधिमात्रेणचिदानंदायतेवपुः॥ इतिनत्वा॥ श्रीगुरुंद्विभुजंशांतंवराभयकराम्बुजं॥ पूर्णेन्दुवदनाभोजंहसंतंशक्तिसंयुतं
श्वेतवस्त्रपरीधानंनानालंकारभूषितं॥ आनंदमुदितंदेवंध्यायेत्पंकजविष्टरे॥ इतिध्यात्वादंडवत्प्रणम्यहंसइतिषट्शता·
धिकमेकविंशतिसाहस्रमजपाजपंमूलंचयथाशक्त्यानप्राजपंगुरवेसमर्प्यतदाज्ञांविधायबहिरागत्यकमलादिसंत्यज्यवर्णा·
न्तांशौचमाचरयन्त्यारौगत्वाओंह्रींकामदेवायसर्वजनमनोहरायनमः॥ इतिदंतान्संशोध्यगंगौदंतशोधनशक्तयेनमः॥ इतिगं
डूषत्रयंविधायमृदंस्नानीयत्रिभागंकृत्वाओंप्रांपृथिव्यैनमः॥ मृत्तिकायैनमः॥ इत्यभिषिच्यमूलेनाभिमंत्र्यमलापकर्षणंस्नानं
कृत्वागंगेचयमुनेचैवगोदावरिसरस्वतिनर्मदेसिंधुकावेरिजलेस्मिन्संनिधिंकुरु॥ इतिश्रीसूर्यमंडलादंकुशमुद्रयातीर्थमावा
ह्यमंदंजलेक्षिप्त्वापठेत्॥ देवेशभक्तिसुलभसपरिच्छदभैरव॥ यावत्त्वांतर्पयिष्यामितावेदेवइहावह इतिजलेत्रिकोणंविभाव्यत

राम:
१०६

त्रमुद्रा देवमावाहयमुद्राः प्रदर्श्य मूलेन प्राणायामं पूर्ववं पादादिशिरःपर्यंतं त्रिरुन्मज्जेत ॥ ततः सूर्यायार्घ्यत्रयं दद्यात् ॥ ॐ ह्रां
ह्रीं सः सूर्याय प्रकाशशक्तिसहिताय एष तेर्घो नमः ॥ इत्यर्घत्रयं दत्वा ततो वासोन्यपरिधार्य कृतांगन्यासः पूर्ववत्प्राणायामत्रयं
चरेत् पू० १६ कुं ६४ रे ३२ इति त्रिर्ध्यात्वा ॐ ह्सः आत्मतत्त्वं शोधयामि स्वाहा ॐ विद्यातत्त्वं शोधयामि स्वाहा ॐ शिवतत्त्वं शोधयामि स्वा
हा इत्याचमनत्रयं विधाय ॥ वामहस्ते जलं धृत्वा तत्त्वमुद्रयाछाद्य यं रं लं वं इति पञ्चभूतमन्त्रेण सप्तवाराभिमन्त्र्य दक्षहस्ते धृत्वा वाम
नासापुटयोगेन तज्जलितोदकबिंदुभिः स्वशिरो मूलमन्त्रेण सप्तदशधाभ्युक्ष्य पुनर्वामहस्ते निधायेडयांतर्नीत्वा देहान्तः पापं प्र
क्षाल्य पिंगलया तज्जलं सकलुषं हस्ते धृत्वा स्ववामभागस्थकल्पितवज्रशिलायामास्फालयेदित्यघमर्षणं विधाय पूर्ववन्न्यासं
कृत्वा ॐ ह्सः परमहंसाय विद्महे सोहंसः मृत्युंजयाय धीमहि सः जूं ॐ तन्नः अमृतेश्वरः प्रचोदयात् इति दशधा प्रजप्य मूलं य
थाशक्त्या जप्त्वा गायत्र्या देवीदेवयोरर्घ्यत्रयं दद्यात् ॥ ॐ सांगायामृतेश्वरीसहिताय मृत्युंजयाय एष ते अर्घो नमः ततः पूर्ववत्सू
र्यायार्घ्यत्रयं दत्वा जले चतुरश्रं सत्र्यश्रं विभाव्य इति मूलमुच्चरन्सप्तवारं सदेवीकं मृत्युंजयं तर्पयेत् ॥ मूलं सांगां सवाहन सायुध

सपरिछदसदेवीकंमृत्युंजयभगवंतंध्यात्वा इतिसंतर्प्यपित्रादितर्प्पणंविधायपूर्ववद्देवंसंहारमुद्रयास्वहृदिसमानीयशि
वोहमितिभावयन्यथासुखंउपमागछेदितिसंध्याविधिः॥ फट्इतिद्वारंप्रक्षाल्यऊर्द्धंगंगणेशायनमः॥ वामदक्षिणक्रमेणम
हालक्ष्मी॥ सरस्वत्यैगंगायैयमुनायैधात्रेविधात्रेनंदायसुनंदाय·चंडाय·प्रचंडाय·क्षेत्रपालाय·वेतालाय·अग्निवेतालायप्रा
वादिनमोंनेनसंपूज्यतत्रासनेमंत्रीउपयंतत्वाभ्योंअनंतासनायनमः॥ विमलासनाय·पद्मासनाय·पृथ्वीत्वयाधृतालोकाःदेवित्वं
विष्णुनाधृतात्वंचधारयमांलोकेपवित्रंकुरुचासनं॥ त्रिर्वामपार्ष्णिघातंदत्वाअपसर्पंतुयेभूतायेभूताभुविसंस्थिताः॥ येभूता
विघ्नकर्तारस्तेनश्यंतुशिवाज्ञया॥ इतिविघ्नानुत्सार्य॥ हुंअघोरायफट्इतिदशदिशोबध्वाभूतशुद्धिंकुर्यात्॥ अद्याहंभूतशुद्धिं
करिष्येइतिसंकल्प्य॥ वामेगुरुभ्योनमः॥ दक्षिणेगणेशायभगवेशिवायैपृष्ठेक्षेत्रपालायइतिनमस्कृत्यप्रणवेनप्राणायामत्र
यंकृत्वा॥ हुमितिमूलाधारात्कुंडलिनींउत्थाप्यसुषुम्नावर्त्मनाहृदयस्थजीवमानीयब्रह्मरंध्रांतंविभाव्यहंसइतिब्रह्मणियो
जयेत्॥ ततःपादादिजान्वंतंपृथिवींजान्वादिनाभ्यंतंजलंनाभ्यादिहृदयांतंवह्निंहृदयादिभ्रूमध्यांतंवायुंभ्रूमध्यादिद्वादशांतं

आकाशंआकाशमहंकारंमहत्तत्त्वेनदेहंप्रकृतौतांसच्चिदानंदस्वरूपेब्रह्मणिविलाप्यस्वात्मानंब्रह्ममयंविभाव्य ॥ अहंदेवोनचान्यो
स्मिब्रह्मैवाहंनशोकभाक्सच्चिदानंदरूपोहंनित्यमुक्तःस्वभाववान् ॥ एवंविभाव्यस्वशरीरंदक्षकुक्षौपापपुरुषंध्यायेत् ॥ ब्र
ह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयं ॥ सुरापानहृदायुक्तंगुरुतल्पकटिद्वयं ॥ तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकं ॥ उपपातक
रोमाणंरक्तश्मश्रुविलोचनं ॥ खड्गचर्मधरंकृष्णंकुक्षौपापंविचिंतयेत् ॥ इतिध्यात्वाशरीरंसकलंसमलिनंविचिंत्यप्राणायामपूर्वं
पंचभूतमंत्रैर्निष्पापंकुर्यात् ॥ हृदादिभ्रूमध्यायंवीजेनषोडशधाजप्तेनवायुमापूर्यपापंसंशोष्य ॥ नाभ्यादिहृत्पर्यंतांतर्गतमग्नि
मग्निवीजेनचतुःषष्टिवारजप्तेनसंदीप्यपापंनिर्दह्य ॥ ॥ जान्वादिनाभ्यांतंजलंवमितिवरुणवीजेनद्वात्रिंशद्वारजप्ते
नादयपापभस्माप्लाव्यलमितिभूवीजेनषोडशधाजप्तेनपादादिजानुपर्यंतंपृथिवींविचिंत्यपिंडीभूतंस्वात्मकंध्यात्वा ॥ हमि
त्याकाशवीजेनसकृज्जप्तेनचैतन्यमुत्पाद्यचिदानंदमयंस्वशरीरमुत्पाद्यप्राणान्स्थापयेदितिभूतशुद्धिः ॥ ओंजूंसःशिवायप्रा
णात्मनेनमइतिस्वहृदिपुष्पंदत्वा ॥ ओंआंह्रींक्रोंयंरंलंवंशंषंसंहंहंसःसोहंओंजूंसःममप्राणाइहप्राणा १९ ममजीवइहस्थि

रुःया
१०८

नः१५॥ममसर्वेन्द्रियाणि ९९ ममवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणाइहैवागत्यसुखंचिरंतिष्ठन्तुस्वाहाइतिप्राणान्स्थुत्वामूलं
स्वहृदिविलिख्यसशिवांशिवंसंपूज्यशिवोहमितिविचिंत्यमंत्रसंकल्पंकुर्यात्॥अस्यश्रीमहामृत्युंजयपूजामंत्रस्यमहाच
मसकोलहोऋषिःदेवीगायत्रीछन्दःश्रीमृत्युंजयरुद्रोदेवताओंबीजंजूंशक्तिःसःकीलकंधर्मार्थकाममोक्षार्थेपूजायांविनि
योगः॥अथन्यासः॥श्रीमहाचमसकोलहोऋषयेनमः॥शिरसिदेवीगायत्रीछन्दसेनमोमुखेश्रीमृत्युंजयरुद्रोमहादेवता
येनमोहृदि॥ओंबीजायनमोनाभौजूंशक्तयेनमोगुह्येसःकीलकायनमःपादयोःजपेविनियोगःइतिसर्वांगे ७ अथकरन्यासः
ओंअंगुष्ठाभ्यांनमःजूंतर्जनीभ्यांसःमध्यमाभ्यांओंअनामिकाभ्यांजूंकनिष्ठिकाभ्यांसःकरतलपृष्ठाभ्यांनमः॥अथषडंगन्यासः॥ओं
हृदयायनमःजूंशिरसेस्वाहा॥सःशिखायैवषट्ओंकवचायहुंसौःनेत्रत्रयायवौषट्सःअस्त्रायफट्॥अथमातृकान्यासःअंनमः
शिरसिःओंनमोमुखवृत्ते॥इत्यादिमातृकान्यासंकुर्यात्अथश्रीकंठमातृकान्यासओंत्मोःअंश्रीकंठपूर्णोदरीभ्यांनमःशिरसि
२ओंआंअनंतेशविरजाभ्यां२इंसूक्ष्मेशशाल्मलीभ्यां२ईंत्रिमूर्तीशलोलाक्षीभ्यां२उंअमरेशवर्तुलाक्षीभ्यां२ऊंअर्घीशदीर्घघोणाभ्यां२

रामः
१०८

ॠं भावभूतेशदीर्घमुखीभ्यां २ ॠं अतिथीशगोमुखीभ्यां २ ऌं स्थाणुकेशदीर्घजिह्वाभ्यां ॥ ॡं हरिकुंडोदरीभ्यां २ एं झिंटीशोर्ध्वकेशीभ्यां
२ ऐं भौतिकेशविकृतमुखीभ्यां २ ओं सद्योजातेशज्वालामुखीभ्यां २ औं अनुग्रहेशोल्कामुखीभ्यां २ अं अक्रूरेशश्रीमुखीभ्यां २ अः महास
नेशविद्यमुखीभ्यां २ कं क्रोधेशमहाकालीभ्यां २ खं चंडेशसरस्वतीभ्यां २ गं पंचांतकेशसर्वसिद्धिभ्यां २ घं शिवोत्तमेयारत्रिलोकवि
द्याभ्यां २ ङं० रुद्रेशमूर्त्तिभ्यां २ चं कूर्मेशात्मशक्तीभ्यां नमः २ छं एकनेत्रेशभूतमातृकाभ्यां २ जं चतुराननेशलंबोदरीभ्यां २ झं अजेश
द्राविणीभ्यां २ ञं सर्वेशनागरीभ्यां २ टं सोमेशखेचरीभ्यां २ ठं लांगलेशमंजरीभ्यां २ डं दारुकेशरूपिणीभ्यां २ ढं अर्धनारीविरिणीभ्यां
२ णं उमाकांतेशकाकोदरीभ्यां २ तं आषाढेशपूतनाभ्यां २ थं दंडेशभद्रकालीभ्यां २ दं अत्रेशयोगिनीभ्यां २ धं मीनीशशंखिनीभ्यां २ नं
मेषेशगर्जिनीभ्यां २ पं लोहितेशकालरात्रिभ्यां २ फं शिखीशकुब्जिकाभ्यां २ बं छागलांडेशकपर्दिनीभ्यां २ भं द्विरंडेशवज्रिणीभ्यां २
मं महाकालेरानयाभ्यां २ यं त्वगात्मभ्यां बालेशसुमुखीभ्यां २ रं असृगात्मभ्यां भुजंगेशरेवतीभ्यां २ लं मांसात्मभ्यां पिनाकेशमाध
वीभ्यां २ वं मेदसात्मभ्यां खड्गीशवारुणीभ्यां २ शं अस्थात्मभ्यां बकेशवायवीभ्यां २ षं मज्जात्मभ्यां श्वेतेशरक्षोवधिनीभ्यां २ सं भु

रु·या
१०९

कात्मभ्यां मूर्त्तीशसहजाभ्यां २ हं नकुलेशलक्ष्मीभ्यां २ लं शक्त्यात्मभ्यां शिवेशव्यापिनीभ्यां ओं स्रौः क्षः क्रोधात्मभ्यां संवर्त्तेशमहामाय-
भ्यां नमः शिरसः पादपर्यंतं पादादिशिरःपर्यन्तं व्यापयेत् ॥ इति श्रीकंठमातृकान्यासः ॥ अथ कलान्यासः ओं ऐं ह्रीं स्रौः सर्वज्ञायां
गुष्ठाभ्यां नमः ४ अमृतज्वालामालिनी तर्जनीभ्यां ४ ॥ ज्वलितशिखिशिखायमध्यमाभ्यां ४ ॥ वज्रिणे वज्रहस्ताय अनामिकाभ्यां ॥ ४
अलुप्तशक्तये कनिष्ठिकाभ्यां ४ ॥ पशुपतये अस्त्राय फट् ॥ एवं षडंग ओं जूं स निवृत्त्यात्मने शिवायांगुष्ठाभ्यां ३ ॥ प्रवृत्त्यात्मने
सदाशिवाय तर्जनीभ्यां ३ विद्याकलात्मने ईश्वराय मध्यमाभ्यां ३ ॥ शांतिकलात्मने महारुद्रायानामिकाभ्यां ३ शांत्यावीतकलात्मने
विष्णवे कनिष्ठिकाभ्यां ३ ज्योतिःकलात्मने परब्रह्मणे करतलपृष्ठाभ्यां नमः ॥ एवं षडंगः ॥ इति कलान्यासः ॥ ओं जूं सः नेत्रनाथाय
अंगुष्ठाभ्यां नमः ॥ हंसः भगवन्नेत्राय तर्जनीभ्यां मां पालय २ सोमसूर्याग्निनेत्राय मध्यमाभ्यां ॥ सोहं सा नेत्रनाथायानामिकाभ्यां जूं
ॐ भगवन्नेत्राय कनिष्ठिकाभ्यां मूलं सोमसूर्याग्निनेत्राय करतलपृष्ठाभ्यां नमः ॥ एवं षडंगः ॥ इति नेत्रन्यासः ॐ नमः शिरसि
जं नमो भ्रूमध्ये ॥ सः नमो मुखे हं नमः कंठे सः नमो हृदि सां नमो हस्तयोः पां नमः स्तनयोः ॥ लं नमः कुक्षौ यं नमः पार्श्वयोः यां नमः पृ

राम:
१०९

स्तुलंनमाताभौयंनमोजन्वोर्हंनमोजंघयोःसःनमःपादयोःजूंनमःपादादिशिरपर्यंतंॐनमःशिरसःपादपर्यंतंइतित्रिव्या
पयेदितिमूलमंत्रंन्यासःॐईशानतत्पुरुषयोरघोरकलिनाम्नोः॥सद्योजातेशवामेशायुवयोर्न्यासमाचरेदितिशिवन्यास
नंॐमूलाधारेजूंभ्रूमध्येसःकरस्त्रेइत्थंन्यासंयथाशक्याविधायदिव्यदेहंध्यात्वाहृदयेॐजूंसःअनंतेश्वरपीठायनमःहृदिगं
धाक्षतपुष्पैःसंपूज्य॥ॐजूंसःहंसःश्रीकालाग्निरुद्रमूलप्रकृतिकूर्मानंतवराहपृथिवीसुधार्णवरत्नद्वीपरत्नमंटपरत्नसिंहा
सनस्याग्निमंटपार्कमंडलामृतमरीचिमंडलांतर्गतसहस्रदलकमलकर्णिकाकेसरकणामृतधारामयाययोगपीठायनमः
इतिस्वहृदयेसंपूज्य॥अमृतीकरणमुद्रांबध्वापद्ममुद्रांतर्गतंपुष्पंसंनिधायमूलाधारात्कुंडलिनींतडित्कोटिप्रद्योतिनींसूर्यकोटि
प्रतीकाशांवह्निकोटिदुर्धर्षांचंद्रकोटिसुशीलतांप्रदीपकलिकाकारामुत्थाप्यसुषुम्नामार्गेणब्रह्मपथांतरस्थानस्थेश्वरेणासहसंयो
ज्यसोममंडलप्रच्युतामृतधारयासंतर्प्यपुनःस्वहृदिसमानीयस्वस्थानंप्रापयित्वामृतशरीरीभूयशिवोहमितिभावयन्देवंभावये
त्॥पीयूषांशुशिरोमणिःकरतलेपीयूषकुंभंवहन्पीयूषद्युतिसंपुटांतरगतःपीयूषधाराधरः॥मांपीयूषमयःस्वसुन्दरवपुः

यीरूपलक्ष्मीसरस्वायीरूपङ्ववर्णगौरहरहः प्राणानुमृत्युंजय॥ एवं ध्यात्वा मानसैरुपचारैः संपूज्य कलशस्थापनं कुर्यात्॥ स
वामे त्रिकोणषट्कोणवृत्तचतुरश्रं विलिख्य शंखमुद्रां प्रदर्श्य षडंगमंत्रैः संपूज्य कटुं प्रक्षाल्य मूलेन संपूज्य ॐ रं वह्निमंडलाय द
शकलात्मनेनमः॥ इति संपूज्य आधारं संस्थाप्य तत्र पात्रमाधारे निधाय॥ हं अर्कमंडलाय द्वादशकलात्मने नमः॥ इति पात्रांतः
संपूज्य तत्र जलेन संपूर्य सौं सोममंडलाय षोडशकलात्मने नमः॥ इति संपूज्य तत्रांकुशमुद्रया गंगे चेत्यादिना तीर्थमावाह्य मू
लेनाष्टभिर्मंत्रितं कृत्वा धेनुयोनिकलशमुद्राः प्रदर्श्य फडिति छोटिकाभिः संरक्ष्य हुमित्यवगुंठ्य शंखचक्रयोनिमुद्राः प्रदर्श्य
प्रणमेत्॥ दर्शनेनापि शंखस्य किं पुनः स्पर्शनेन च॥ विलयं यांति पापानि हिमवद्भास्करोदये॥ इति सामान्यार्घविधिः सामा
न्यार्घं दर्शयेद्विंदुस्त्रिकोणषट्कोणवृत्तचतुरश्रं मंडलं निर्माय॥ कामरूपोड्याणजालंधरपूर्णगिरिपीठेभ्यो नमः॥ इति चतुरश्रेषु सं
पूज्य षट्कोणेषु षडंगमंत्रान्संपूज्य त्रिकोणे वीजत्रयेण संपूज्य विंदौ मूलेन संपूज्य रं अग्निमंडलाय दशकलात्मने नमः॥ इति प्रक्षालि
तमाधारं संस्थाप्य अं अर्कमंडलाय द्वादशकलात्मने नमः॥ इति कलशं कुंभमुद्रया संस्थाप्य तत्र ॐ ज्रां ज्रीं ज्रूं ज्रैं ज्रौं ज्रः सः अमृते

श्रभैरवायनमः ॥ इतिमूलेनवामूलविद्ययातत्त्वमुद्रयाधारापातेनपरमानंदेदडयादिनाकुंभमापूर्य्यसौः सोममंडलायषोडश
कलात्मनेनमः ॥ इतिगंधाक्षतपुष्पैरभ्यर्च्यहंसइतिमंत्रेणाद्दशदिशोवध्वाकोटिकाभिः संरक्ष्यहुमित्यवकुंठ्यनमइत्यभ्यर्च्यमूले
दशधाजप्त्वाअमृतमुद्रांप्रदर्श्य ॐ अंआंइं ॐ जूंसः अमृतेअमृतोद्भवेअमृतवर्षिणिअमृतंस्रावय २ ॐ जूंसः अमृतेश्वर्य्यैनमइ
तिदशधाजप्त्वा ३ सूर्य्यमंडलसंभूतवरुणालयसंभवे ॥ अमाबीजमयेदेविशुक्रशापाद्विमुच्यतां ॥ ३ देवानांप्रणवोबीजंब्रह्मा
नंदमयंयदितेनसत्येनतेनदेवित्वंब्रह्महत्यांव्यपोहतु ३ एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवं ॥ कचोद्भवांब्रह्महत्यांतेनतेनाशया
म्यहं ॥ ३ ब्रह्मशापविमुक्तात्वंमुक्ताद्विजशापतः ॥ विष्णुडीकृतरुद्रशापेनपवित्राभवसांप्रतं ॥ इतिजप्त्वाऔंहसक्षमलवरयूंआ
नंदेश्वरभैरवायवौषट् इतिदशधाजप्त्वा ॥ ॐ हसक्षमलवरयूंजप्त्वामूलंत्रिर्जप्त्वागंगेचेत्यंकुशमुद्रयातीर्थान्यावाह्यकुंडलि
नींज्योतिरूपामुत्थाप्यषट्चक्राणिभित्वाब्रह्मरंध्रस्थपरशिवभट्टारकेननियोज्यतत्रहंसः सोहंस्वाहाइतिविचिंत्यतयोःसामर
स्योद्भवानंदरसेनामृतवाहिनानानावृष्टिनिसृतामृतधारयाकलशमापूर्य्यामृतमयंध्यात्वागंधाक्षतपुष्पैरभ्यर्च्यधेनुयोनिमत्स्य

रु·या
११८

मुद्राः प्रदर्श्य प्रणामेदिति द्रव्यशुद्धिः ॥ ततो ॐ जूं सः हंसः परमामृते श्री अमृतेश्वरी महामृत्युंजय स्वाहा द्रव्यं शोधयेत् ॥ इति क
लशादमृतमादाय ॐ जूं स हंसः सोहं स जूं ॐ इति दशाक्षरमूलेन श्री अमृतेश्वरीश्वर महामृत्युंजय चंडामृतमयेन कलशा
मृतेन यागद्रव्याणि यविश्री कुरु स्वधादिना पूरय ॐ ह्रौं स्वाहा इति यागवस्तूनि संशोध्य सामान्यार्घ्यस्याथ ॥ त्रिकोणांस
हारं विभाव्य मूलबीजत्रयेण त्रिकोणं संपूज्य मूलविद्यया बिंदुमभ्यर्च्य तत्राग्निसूर्यसोममंडलानि संपूज्य दिव्यपात्रं संस्था
प्य कलशामृतेनापूर्य मूलविद्यया संपूज्य ॐ पृथिव्यादिषड्विंशत्तत्त्वानि संपूज्य महामुद्रां प्रदर्श्य अग्निपक्वामृतमुद्रा ॥ प्रद
र्श्य मातृकादेवीं संपूज्य मूलवर्णमंत्रान् संपूज्य रोगादितीथान्यावास्त ईशानकलाः संपूज्य तत्पुरुषाघोरसद्योजातवामदेवक
लाः संपूज्य शिवमयं ध्यात्वा परमामृतं बुध्वा विंदुयानाम्नि दीपं प्रज्वाल्य शिवमयं जगद्भावयेदिति परमार्घ्यपात्रं ॥ सामान्यार्घ्यस्य
वामे गुरुपंक्ति योगिनी वीर बटुक क्षेत्रपाल पात्राणि संस्थाप्य तथोत्तरे पाद्याचमनीयमधुपर्काचमनीयार्घ्यपात्राणि संस्था
प्य स्थापयेदिति पात्रसंस्थापनं पाद्यादिपात्रे श्रुपानीयं गुरुपात्रादिषु दिव्यामृतेन आत्मानं मूलविद्यया संपूज्य स्वाधारकुंडलि

रामः
११९

नीमुत्॥ ध्यायपरमशिवेनसंयोज्यचंद्रमंडलस्थ॥ महामृत्युंजयललाटगतंसचंद्रकलास्रुतामृतधारयास्वात्मानंसंप्लाव्यशिवो
ऽहमिति॥ स्मृत्वाचिदानंदमयोभूत्वाविश्वेश्वरमिवध्यात्वासदेवीकंशिवंहृत्कमलेआनीययथोक्तंस्मृत्वामानसैरुपचारैः॥ संपूज्यस्वात्मा
नंतन्मयंभावयित्वाश्रीचक्रंपुरतःचतुरस्रोद्भासितारणत्रयविराजितवसुदलस्वस्तिकंषडभ्रमंहितत्रिकोणस्वसितविंदुमंडलंश्रीयंत्रराजं
विलिख्यवाप्रक्षाल्यश्रीरत्नपीठंसंस्थाप्ययोगपीठपूजांकुर्यात्॥ ॐ ह्रंसः हंसःसोहंसः ह्रूं ॐ अकादिक्षकारांतमुद्रायै ॐ शिवशक्तिस
दाशिवईश्वरशुद्धविद्यामायाकलाविद्यारागनियतिपुरुषप्रकृत्यहंकारबुद्धिमनश्चक्षुश्रोत्रजिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्द
स्पर्शरूपरसगंधाकाशवायुवह्निसलिलपृथिव्यात्मनेश्रीयोगपीठायनमः॥ इतिश्रीचक्रेसंपूज्यवसुपत्रेषु॥ ॐ वामायैनमः॥
ज्येष्ठायैरौद्र्यैकाल्यैकलविकरिण्यै॥ बलविकरिण्यैबलप्रमथिन्यैसर्वभूतदमन्यै॥ इत्यभ्यर्च्य ॐ ह्रंसः नमोभगवतेसकलगुण
त्मशक्तियुक्तायपरानंतायययोगपीठात्मनेनमः॥ इतियोगपीठंसंपूज्यअमृतीकरणमुद्रांबध्वामूलमंत्रेणसकन्यावाहयेत्
मूलेनसुषुम्नयाहृत्कमलस्थांज्योतिर्वामनासयानिस्सार्यकरस्थपुष्पेषुस्थितंध्यात्वादेवमावाहयेत्॥ स्वात्मसंस्थमजंशुद्धंत्वाम

त्परमेश्वर ॥ अरण्यामिवहव्यांशंविंदावावाहयाम्यहं ॥ देवेशभक्तिसुलभपरिवारसमन्वित ॥ यावत्वांपूजयिष्यामितावद्देवइहावह
इतिमूलमुद्रार्यंयंत्रेपुष्पाणिदत्वावाहन् ॥ संस्थाप्यसंनिरुध्यमूलेनदशमुद्राःप्रदर्श्य ॥ ॐ क्रूं सः आं ह्रीं क्रों यं रं लं वं शं षं सं हं ॐ क्रूं
सः हंसः अमृतीश्वरीसहितस्यमृत्युंजयस्यदेवस्यप्राणाइहप्राणाजीवइहस्थितः सर्वेन्द्रियाणिवाङ्मनश्चक्षुःश्रोत्रजिह्वाघ्राणप्राणा
इहैवागत्यसुखंचिरंतिष्ठंतुस्वाहा इतिदेवीदेवयोः प्राणान्स्थाप्यपंचमुद्राःप्रदर्श्यधेनुमुद्रयामृतीकृत्यषडंगैः सकलीकृत्य ॥ शं
खचक्रत्रिखंडयाशकलशमालामुद्राप्रदर्श्यभगवन्नमृतीश्वरीसहितमृत्युंजयइदमासनंशाध्यतांफट् भगवन्स्वागतमित्यु
दीर्यनमस्कृत्यमुद्रयाप्रणम्यमूलेभगवन्सदेवीकआचमनीयंस्वधा ॥ मूलंभगवन्सदेवीकमधुपर्कंस्वधा ॥ भगवन्सदेवीकइद
मर्घ्यस्वाहा ॥ मूलंभगवन्सदेवीकासनपूर्वंतानिपुष्पाणिवौषट् ॥ श्यामाकदूर्वाकसमंमिश्रिताक्षताभिमिश्रितं ॥ गांगोदकंसमाह
यमूलमन्त्रेणाभिमन्त्रयेत् ॥ मू भगवन्देवीकमहाश्वेतमहार्घवस्त्रयुग्मंनमः ॥ मू भगवन्सदेवीकसुमाभरणानिनिवेदयामि ॥ मू भ
गवन्सदेवीकरत्नसिंहासनेउपविश्यतां ॥ मू श्रीभगवन्सदेवीकगंधाक्षतपुष्पाणिवौषट् मू ॥ धूपदीपौदत्वापरमीकरणमुद्राप्रद

ध्यत्रिकोणवृत्तमंडलं विभाव्य साधारं पात्रं संस्थाप्य दिव्योदनं पञ्चसोपेतं नानाव्यंजनयुतं धेनुमुद्रयामृतीकृत्य ॐ अमृतोपस्त
णमसि स्वाहा इति निक्षिप्य मूलेन दशधा जप्त्वा प्राणादिपंचग्रासमुद्राः प्रदर्श्य ॐ अमृतापिधानमसि स्वाहेति भगवते शिवाय जल
दत्त्वा मूलेन तांबूलं निवेद्य दिव्यपात्रामृतेन दशधा संतर्प्य प्रणाम्य परिवारदेवता देवांगानि स्मृत्वा ध्यात्वा यथोपचितस्थानेषु संस्था
प्य ध्यात्वा प्राणायामपूर्वकं प्राणायामत्रयं विधाय श्रीचक्रे परिवारदेवताः पूजयेत् ॥ ॐ ह्रूं सः कामेश्वरश्रीपा वीरपात्रामृतेन ईशानाग्ने
याग्रेषु पूजयेत् ॥ ३ महाकालश्री ३ स्वच्छन्दश्री इति प्रथमावरणं मूलेन मूलदेवं संपूज्य ॥ ३ कालाग्निरुद्रश्री ३ नेत्रेशश्री ३ विश्वनाथश्री ३
महेश्वरश्री ३ सद्योजातश्री ३ वामदेवश्री ३ इति संपूज्य मूलेन मूलदेवं संतर्प्य षट्कोणेषु द्वितीयावरणं ॥ ३ असितांगभैरवश्री ॥ रुरुभै
रवश्री ३ चण्डभैरवश्री ३ क्रोधभैरवश्री ३ उन्मत्तभैरवश्री ३ कपालीशभैरवश्री ३ भीषणभैरवश्री ३ संहारभैरवश्री मूलेन मूलदेवं संपू
ज्य सव्यामावर्त्तेन अष्टदलेषु तृतीयावरणं ॥ ३ ब्रह्माणीश्री ३ माहेश्वरीश्री ३ वैष्णवीश्री ३ वाराही ३ नारसिंहीश्री ३ इन्द्राणीश्री ३ चामुण्डाश्री
महालक्ष्मीश्री इति योगिनीपात्रामृतेन संतर्प्य दिव्यामृतेन मूलदेवं सदेवीकं संतर्प्य सव्यामावर्त्तेन वसुदले ॥ चतुर्थावरणं ३ स्वगु

मृ॰या
११३

मूश्री३ परमगुरु मूश्री३ परापरगुरु मूश्री३ परमेष्ठिगुरु मूश्री३ इति गुरुपात्रामृतेन संतर्प्य दिव्यामृतेन सदेवीकं देवविदो संतर्प्य मन्त्रह
त्तये ॥ पंचमावरणं ॥ लं इंद्रश्री३ रं अग्निश्री३ यं यमश्री३ क्षं निर्ऋतिश्री३ वं वरुणश्री३ यं वायुश्री३ सं सोमश्री३ हं ईशानश्री३ ह्रीं
अनंतश्री३ ब्रह्मश्री पादुकां पूजयामि तर्पयामि इति वीरपात्रामृतेन संतर्प्य चतुरश्रे षष्ठमावरणं ३ वज्रश्री शक्तिश्री दंडश्री ख
ड्गपाशश्री ध्वजश्री गदाश्री· त्रिशूलश्री· चक्रश्री· पद्मश्री पा३ इति वीरपात्रामृतेन संपूज्य दिव्यामृतेन विदैदेवं संतर्प्य सप्तमावरणं
मूलश्री· अमृतेश्वरीशक्ति सहितश्री मृत्युंजयश्री मू अमृतेश्वरश्री ॥ मू ईशानश्री मू भुवनेश्वरश्री मूश्री मदमत्तेश्वरीसहित दीक्षा
नायकश्री महामृत्युंजयश्री दशावासे संपूज्य संतर्प्य अष्टमावरणं ॥ मूलत्रिखंडश्री मूपाशश्री मू सुधाकलशश्री · मू: मुक्ताक्षसू
त्रश्री· मू: इति परामृतेन विदो संतर्प्य सशक्तिकं देवं विदो संपूज्य नवमावरणं · मू: मुष्टिमुद्राश्री३ मू: सारंगमुद्राश्री मू: लिंगमुद्रा
श्री मू: योनिमुद्राश्री पंचमुखमुद्रा इति विदो परामृतेन संतर्प्य मूलविद्यामुच्चार्य श्रीमदमृतेश्वरीसहित महामृत्युंजयश्री पादविदे
ति संपूज्य दशमावरणं इति नत्वा पुनर्नैवेद्यं ॥ रत्नपात्रस्थितं दिव्यं नानाव्यंजनशालिसंहितं ॥ दिव्यौदनं निवेद्यस्तु परमामृतसंयु

रामः
११३

तं मगसुद्रया निवेद्य प्रणाम्य मूलांते आचमनीयं तां मूलाद्य त्रिकाछत्रचामरादर्शप्रभृतीनि दिव्यानि वस्तूनि सदेवीकाय देवाय निवे
द्य साष्टांगप्रणामेन ॥ देवाग्रे मालामादाय मूलेन जप्त्वा ॐ गुह्यातिगुह्यगोप्त्री त्वं इत्यादिना जपं निवेद्य देवाग्रे कवचसहस्रनामस्तवपा
ठं कृत्वा तदपि देवीदेवयोः समर्प्य ॥ ॥ ॐ स्रां स्रीं स्रूं स्रैं स्रौं स्रः क्षेत्रपालेभ्यो वौषट् इति बलिं निवेद्य ॐ यां यीं यूं यैं यौं यः सौः सः हूं ॐ
सर्वाभ्यो योगिनीभ्यो बलिन्नमः ॥ ॐ ह्रीं सर्वविघ्नकृद्भ्यो भूतेभ्यो बलिर्वषट् स्वाहा ॥ इति बलिं दत्वा प्रणाममुद्रां प्रदर्श्य दंडवत्प्रणामेन
नतो वीरैः सह वीरपानं विधाय पूर्णायाचं हुत्वा स्वशक्तिमानंदनिर्भरां निर्माय रतेन संतर्प्य शिवोहं भावयेद्देवं सदेवीकं ज्योतिरूपं
संहृतिमुद्रया श्रीचक्रादुत्थाप्य वामनासया तं नीत्वा तत्तेजः परमं चैतन्यज्योतिषि चिद्रूपिणि निलीनं ध्यात्वा ॥ अहमेव परो हंसः शिवः प
रस्फारणामन्याशोत्यक्तपेक्ष्यत्वाल्लीनः समरसीगतः ॥ इति ध्यात्वा परमशिवो भूत्वा स्वशक्त्या सह सुखं विहरेत् ॥ आत्मवैभवः आचार
परायणः कालं नयेत् ॥ इति श्रीचक्रमुत्थाप्य मूलेन प्रक्षाल्य निर्माल्यं ॐ जूंसः रुं ॐ स्वाहा इतीशानदिशि निर्माल्यं क्षिपेत् ॥ इतीदं दे
वदेवस्य महामंत्रं गुंफ्यस्यते ॥ नित्यपूजाकृतिः सम्यक् निर्णीता कुलसुंदरि ॥ गुह्यातिगुह्यगोप्तृत्वं पद्धतिं नित्यकर्मणः ॥ वर्णितानि

त्रनाथ -- रेयं यंत्रब्रह्मवादिभिः सर्वतंत्रैकसर्वस्वं रहस्यं यास्लौकिकं ॥ एतज्जातं तं मया ख्यातं गोपनीयं मुमुक्षुभिः ॥ ॥ इति श्रीदेवीरह
स्ये तंत्रे श्रीमृत्युंजयपद्धतिवर्णनाख्यानं नाम द्विचत्वारिंशः पटलः ॥ ४२ ॥ श्रीभैरवः ॥ शृणु प्रिये परमेशानि कवचं मन्मुखोदितं म
हामृत्युंजयस्यास्य न देयं परमाद्भुतं ॥ यं धृत्वा यं पठित्वा च यं श्रुत्वा कवचोद्भवं ॥ तवं ॥ त्रैलोक्याधिपतिर्भूत्वा सुखितोस्मि महेश्वरि त
देव वर्णयिष्यामि तव प्रीत्या वरानने ॥ तथापि परमं तत्त्वं न दातव्यं दुरात्मने ॥ अस्य श्रीमहामृत्युंजयकवचस्य श्रीभैरव ऋषिगाय
त्री छंदः ॥ श्रीमृत्युंजयरुद्रो महादेवो देवता ॥ ॐ बीजं जूं शक्तिः सः कीलकं हौं इति तत्त्वं चतुर्वर्गसाधने पाठे विनियोगः ॥ चंद्रमंडल
मध्यस्थे रुद्रमाले विचित्रिते ॥ तत्रस्थं चिंतयेत्साध्यं मृत्युं प्राप्नोति जीवति ॐ जूं सः हौं शिरः पातु देवो मृत्युंजयो मम ॥ ॐ श्रीं शिवो ललाटं
मे ॐ हौं भ्रुवौ सदाशिवः ॥ नीलकंठोवतान्नेत्रे कपर्दी मेवताच्छ्रुती ॥ त्रिलोचनोवताद्गंडौ नासां मे त्रिपुरांतकः ॥ मुखं पीयूषघट
भृदोष्ठौ मे कृत्तिकांबरः ॥ हनुं मे हाटकेशानो मुखं बटुकभैरवः ॥ कंधरां कालमथनो गलं गणप्रियोवतु ॥ स्कंधौ स्कंदपिता पातु हस्तौ मे
गिरिशोवतु ॥ नखान्मे गिरिजानाथः पायादंगुलिसंयुतान् ॥ स्तनौ तारापतिः पातु वक्षः पशुपतिर्मम ॥ कुक्षिं कुबेरवरदः पार्श्वौ मे मार

शासनः॥ सर्वः पातु तथा नाभिं शूली पृष्ठं ममावतु॥ शिश्नं मे शंकरः पातु गुह्यं गुह्यकवल्लभः॥ कटिं कालांतकः पायात् उरू मेंधकघातनः जागरूकोऽवतां जानू जंघे मे कालभैरवः॥ गुल्फौ पायाज्जटाधारी पादौ मृत्युंजयोऽवतु॥ पादादिमूर्धपर्यंतमघोरः पातु मां सदा शिरसः पादपर्यंतं सद्योजातो ममावतु॥ रक्षाहीनं नामहीनं नामहीनं वपुः पात्वमृतेश्वरः॥ पूर्वे बलविकरणो दक्षिणे कालशासनः॥ पश्चिमे पार्वतीनाथो ह्युत्तरे मां मनोन्मनः॥ ऐशान्यामीश्वरः पायादाग्नेय्यामग्निलोचनः॥ नैर्ऋत्यां शंभुरव्यान्मां वायव्यां वायुवाहनः॥ ऊर्ध्वे बलप्रमथनो पाताले परमेश्वरः॥ दशदिक्षु सदा पातु महामृत्युंजयश्च मां॥ रणे राजकुले द्यूते विषमे प्राणसंशये पायादों जुं महारुद्रो देवदेवो दशाक्षरः॥ प्रभाते पातु मां ब्रह्मा मध्याह्ने भैरवोऽवतु॥ सायं सर्वेश्वरः पातु निशायां नित्यचेतनः॥ अर्धरात्रे महादेवो निशांते मां महोमयः॥ सर्वदा सर्वतः पातु ॐ जुं सः हौं मृत्युंजयः॥ इतीदं कवचं पुण्यं त्रिषु लोकेषु दुर्लभं॥ सर्वमंत्रमयं गुह्यं सर्वतंत्रेषु गोपितं॥ पुण्यं पुण्यप्रदं दिव्यं देवदेवाधिदैवतं॥ य इदं पठयेन्मंत्री कवचं वाचयेत्ततः॥ तस्य हस्ते महादेवि त्र्यंबकस्याष्टसिद्धयः॥ रणे धृत्वा चरेद्युद्धं हत्वा शत्रूनजयं लभेत्॥ जयं कृत्वा गृहं देवि संप्राप्स्यति सुखी पुनः॥ महाभये महाघोरे महामारीभये तथा॥ दुर्भिक्षे शत्रुसंहारे पठेत्कवचं

मादरात्॥ सर्वंतत्प्रशमंयातिमृत्युंजयप्रसादतः॥ धनंपुत्रान्सुखंलक्ष्मीमारोग्यंसर्वसंपदः॥ प्राप्नोतिसाधकःसद्योदेविसत्यंनसं-
शयः॥ इतीदंकवचंपुण्यंमहामृत्युंजयस्यतु॥ गोप्यंसिद्धप्रदंगुह्यंगोपनीयंस्वयोनिवत्॥ ॥ इतिश्रीदेवीरहस्येतंत्रेमहामृत्युंज-
यकवचरस्यानंनामत्रिचत्वारिंशःपटलः॥ ४३ ॥ श्रीभैरवः॥ अधुनाश्रृणुदेवेशिसहस्राख्यमनुत्तमं॥ महामृत्युंजयस्यास्यसारात्सा-
रतमोत्तमं॥ ॐअस्यश्रीमहामृत्युंजयसहस्रनामस्तोत्रमंत्रस्यभैरवऋषिः उष्णिक्छन्दः श्रीमहादेवोमृत्युंजयोदेवता॥ ॐबीजंजूं-
शक्तिःसःकीलकंचतुर्विधपुरुषार्थेजपेविनियोगः॥ ध्यानं॥ उद्यच्चन्द्रसमानदीप्तिममृतानंदैकहेतुंशिवंॐजूंसःभुक्तैकसृष्टिप्रल-
याद्भूत्यैकरक्षाकरं॥ श्रीमन्नारदशारदामुनिनतंत्र्यक्षंद्विबाहुंपरं॥ श्रीमृत्युंजयमीश्वरंविक्रमगुणैःपूर्णंहृदब्जेभजे॥ ॐजूंसःहौंम-
हादेवोमंत्रज्ञोमानदायकः॥ मानीमनोरमोरामश्चमनस्वीमानवर्द्धनः॥ मायाकर्तामल्लरूपोमल्लोमारान्तकोमुनिः॥ महेश्वरोमहामान्यो-
मंत्रीमंत्रजनप्रियः॥ मारुतोमरुतांश्रेष्ठोमासिकःपक्षिकोमतः॥ मातंगगोमत्तचित्तोमत्तचिन्मत्तभावनः॥ मानवेष्टप्रदोमेषोमीनकी-
पतिवल्लभः॥ मानदोयोमधुस्नेहीमारयुक्तोजितेन्द्रियः॥ जयोविजयदोजेताजयेशोजयवल्लभः॥ डामरेशोविरूपाक्षोविश्वभक्तावि

मावसुः॥ विश्वेशो विश्वतीर्त्तश्च विश्वसूर्विश्वनायकः॥ विनीतात्मा विनयी वादी वार्त्तिदो वाग्भवोवहुः॥ स्थूलः सूक्ष्मः चलो लोलो लोलजि
ह्वाकरालकः॥ विराध्यो योदिरागी नो विलासी लास्यलालसः॥ लोलाक्षो लोलधीर्धर्मी धर्मानुदो धनदावि -- चमी ध्येयाप्यध्येयश्च
धर्मो धर्मसयोदयः॥ दयावान्दिव्यजनको देवसेव्यो दयापतिः॥ सुर्तिदः सुन्दरीवासो दामी देवमयात्मवक्रुरूपः कीर्त्तिदः कांतः कृ
षो कोवात्मकः कुजः बुधो विद्यामयः कामी कामकालाधकांतकः॥ जीवो जीवप्रदः शुक्रः शुद्धः शर्मप्रदोनघः॥ शनैश्चरो वेगगतिर्वाचा-
लो राहुरव्ययः॥ केतुः कारायति कालः सूर्यो मितपराक्रमः॥ चन्द्रो मदप्रदो भास्वान् भाग्यदो भगरूपधृक्॥ सूर्त्तो मूर्त्तो वियोगी च स
गी गंगाधरो गजः॥ गजाननप्रियो योगी नोगानीरत्नार्च्चनप्रियः परमः पीवरांगश्च पार्वतीवल्लभो महान्॥ परात्मको विरादास्यो वानरो
मित्रकर्मकृत्॥ चिदानंदश्चारुरूपो गारुडो गरुडप्रियः॥ नंदीश्वरो नयो नागो नागालंकारमंडितः॥ नागहारो महानागो गोगाधरो गोप
तिरूपः॥ त्रिलोचनस्त्रिलोकेशस्त्रिमूर्त्तिस्त्रिपुरांतकः॥ त्रिधामयो लोकमयो लोकैकव्यसनापहः॥ व्यसनोतांपितः शंभुः त्रिधारूपस्त्रि
वर्णभाक्॥ त्रिज्योतिस्त्रिपुरीनाथः त्रिधाशानस्त्रिधागतिः॥ त्रिधागुणी विश्वकर्त्ता विश्वभर्त्ताधिपुरुषः॥ उमेशो वासुकिर्वीरो वैनतेयो

रु·या
११६

विचारवन्नत्॥ विधेयेकाक्षो विशालाक्षो विधिर्विधिरनुत्तमः॥ विद्यानिधिः सरोजाक्षो निस्मरः स्मरशासनः स्मृतिदः स्मृतिमान्स्मार्त्तो ब्रह्म
विदांवरः॥ ज्वाली व्रती ब्रह्मचारी चतुरः चतुराननः॥ चलाचलो चलगतिर्वगीराग्निपो वरः॥ सर्ववासः सर्वगतिः सर्वमान्य सनातनः॥ स
र्वव्यापी सर्वरूपः सागरस्थ्व सदैरौड वपुर्वसुः॥ वसुमान्वसुमेश्वरः॥ समनेत्रो समद्युतिस्समकायः सरोवरः॥ सरस्वान्सत्यवाक्सत्यः
सत्यरूपः सुधी सुखी॥ स्वाराट् सत्यः सत्यसतीसदैरौडवपुर्वसुः वसुमान्वसुधानाथो वसुरूपो वसुप्रदः॥ ईशानः सर्वदेवानां ईशान
सर्वदेवानां ईशानः सर्वबोधिनां॥ ईशो वशो पो व्ययवीडाप्रमयीश्रियःपतिः॥ रुद्रश्च रुद्रावतंसी चचराचरजगत्स्थितिः॥ स्थिरः स्था
णुरणुः पीनः पीनवक्षाः परात्परः पीवरूपो जयधारी जय-- समाकुलः॥ पशुरूपः पशुपतिः पशुज्ञानी पयोनिधिः॥ वेद्यो वेद्यो वेदम
यो विधिज्ञो विधिमान्मृडः॥ शूली शुभंकरो गो-- शुकेशोकद्रोदंभविवर्जितः॥ देवो महोदधिर्दिव्यो दिव्यकीर्त्तिर्दिवाकरः॥ शुभकर्त्ता
शचिपतिः॥ शशांकधवलः स्वामी वज्री शंखी गदाधरः॥ चतुर्भुजश्चाष्टभुजः सहस्रभुजमंडितः॥ स्रुवहस्तो दीप्तकेशो क्रोधदंभविव
र्जितः॥ देवो महोदधिर्दिव्यो दिव्यकीर्त्तिर्दिवाकरः॥ उग्ररूप उग्रपतिरुग्रवक्षास्तपोमयः॥ तपस्वी जटिलस्तापीतापहर्त्तापवर्जितः

रामः
११६

हरित्यश्वोहयपतिर्हयदोहरिमंडितः ॥ हरिवाही महैजस्को नित्योनित्यात्मकोनलः ॥ समानिसंरु नित्यागी सर्गीसंनिधिरन्वय ॥ श्रिया
धरोविमानीचवैमानिकवरप्रदः ॥ वाचस्पतिर्वसासारोवामाचारीवलंधरः ॥ वाग्भवोवासवोवायुर्वासनावीजमंडितः ॥ वासीकोल
भूर्दक्षोदक्षयज्ञविनाशनिः ॥ दाक्षौदौर्भाग्यहादैत्यमर्द्दनोभोगवर्द्धनः ॥ भोगीरोगहरोभोगीहारीहरिविभूषणः ॥ बहुरूपोबहुमति
र्वहुचित्तोविचभराः ॥ नृत्तकृच्चित्तसंतोषोनृत्तगीतविशारदः ॥ शरद्दर्वविभूषात्मा गलदघौघनाशनः ॥ नागीनागमयोनंतोन
रूपःपिनाकभृत् ॥ नष्टमोहाप्तकेशानोवन्दीयास्वरवर्णभृत् ॥ आकारीटंकहस्तश्चपाशीशार्ङ्गीशशिप्रभः ॥ सहस्ररूपोसमगुः स
भूतामभयप्रदः साधुसेव्यः साधुगतिः सेवाफलप्रदोविभुः ॥ सुमहोमध्यमोसन्तोमनन्तमूर्त्तिसुमंतकः ॥ कालाशीलाकरोलुतो
भयबंधैकमोचकः ॥ रोविष्णुर्विष्णुरच्युतोनूतनोनूतनोनव ॥ न्यग्रोधरूपोभयदोभयहारीतिधारणः ॥ धरणीधनसेव्यश्चध
राधरश्रुतायतिः ॥ धरीधरोथकपिशुर्विज्ञानोमोहवर्जितः ॥ स्थाणुकेशोजटीग्राम्योग्रामारामोरमाप्रिय ॥ प्रियकृत्प्रियरूरप
श्चविप्रयोगीप्रतापनः प्रभाकरः प्रभादीप्तोमन्युमान्यनवेश्वरः ॥ तीक्ष्णाबाहुस्तीक्ष्णाकरस्तीक्ष्णांशुस्तीक्ष्णालोचनः ॥ तीक्ष्णा

द्व्या
९७

चेतनस्वयीमूर्त्तिस्त्रयीतनुः॥ हरिर्मुग्धविषांशोमेतिर्लीलाहलोहलीयति॥ हविष्मान्द्रोचनोहालामयोहरितरूपभृत --मामवयो
नृक्षोउमाङ्गोकुलनभुगारी॥ गुहाङ्गोगरुडोगीवनम्बरोविक्रमीक्रमी॥ क्रमेश्वरःक्रमकरःक्रमिक्रांतमानसः॥ महोतेजोनहरिणी
मोहितामोहवल्लभ॥ मनस्वीत्रिदशोवालोवालायतिरथापहः॥ वाल्योरिपुहरोल्हायीगविगविमतोगुणाः॥ सगुणोदिनराड्क्रियो
विरोधनोविभावसु॥ मालामयोमाधवश्चविकर्त्तनोविकर्त्तनः॥ मानकृत्स्मृतिदोगुह्योसाध्यःशत्रुभयंकरः॥ हिरण्यरेतःसुभगः
सतीमथःसुरायतिः॥ मेरुमैनाकभगिनीपतिस्सतमरूपभृत॥ आदित्योदितिजेशानोदितिपुत्रक्षयंकरः॥ वसुदेवोमहाभाग्यो
विश्वावसुर्वसुप्रिय॥ समुद्रोमिततेजश्चखगेजोविशिखोशिखी॥ गरुत्मान्वज्रहस्ताश्चयोलोमीनाथईश्वरः॥ यज्ञपेयोवाजि
पेयःशतक्रतुशतानन॥ प्रतिष्ठस्तीव्रविश्रंभीगंभीरोभाववर्धन॥ गापिष्ठोमधुरालापोमधुमत्तेश्चमाधवः॥ भयात्माभोगि
नाचतानाकिनामिष्टदायक॥ नाकैंडोजनकोजन्यःसंभ्रमोरंभनाशनः॥ ईशानईश्वरईशःशर्वीपतिरोश्वरः॥ लिंगाध्यक्षसु
राध्यक्षोवेदाध्यक्षोविचारकः॥ भवोनन्यनगेशानोनखवाहनसेवित॥ चतुराभाविताभाविभावदोभवभीतिहा॥ ईशानीसहितो

राम:
९७

रामो विरामो रात्रिवल्लभः ॥ मंगलो धरणीपुत्रो धन्यो बुद्धिविवर्द्धनः ॥ जयो जीवेश्वरो जारो जाठरो जह्नुतापनः ॥ जह्नुकन्याधरो कल्यो
वत्सरो मासरूश्च ॥ ऋतुऋतुसुताध्यक्षो विहारि विहगाधिपः ॥ शुक्लांबरो नीलकंठः शुक्लो भृगुसुतो भंगः ॥ शांत शिवप्रदो मेयो भेय
कृच्छांतिकृद्यतिः ॥ नाथो दांतो भिक्षुरूपादान्यः श्रेष्ठो विशांपतिः ॥ कुमारः क्रोधनः क्रोधी विरोधी विग्रहो रमः ॥ नीरसः सुरसः सिद्धोवृ
षयोवृषपानन ॥ पंचास्यश्चतुरश्चैव दविमुखः सुमुखीप्रिय ॥ दुर्मुखो दुर्जयो दुःखी सुखी सुखविलासदः ॥ पात्री पोत्री सविचक्षु
भूतात्मा — —मोनकः ॥ अक्षरं परमं तन्त्वं वलवान्वलिघातनः ॥ भल्ला भैलिर्भवाभावो भवाभावविमोचनः ॥ नारायणो मुक्तकेशो
दिग्देवो धर्मनायकः ॥ कारामोक्षप्रदो जेयो महांगः सामगायनः ॥ असंगमो नामकारी चारी स्मरनिसूदनः ॥ कृष्णकृष्णाम्बरःस्तुत्य
नाएवर्णास्वपाकुलः ॥ त्रयामात्तुर्गीति चात्ता दुर्गमो दुर्गघातकः ॥ महानेत्रो महादाता नानाशास्त्रविचक्षणः ॥ महास्कंधो महादंता
महाकर्णो महोरगः ॥ महाचक्षुर्महानाशो महाग्रीवो दिगालयः ॥ दिग्वाशोर्दिग्गजेशानो मुंडी मुंडाक्षसूत्रभृत् ॥ श्मशाननिलयो रा
गी महाकटिरनूतनः ॥ पुराणपुरुषः परः परमात्मा महाकरः ॥ महालक्ष्यो महाकेशो महेष्टो मोहनो विराट् ॥ महामुखो महासंगो मंड

रु॰या
११८

लीकुंडलीनटः॥ असपत्नपर्वहस्तश्चपाटबंकेरपत्र॥ लालसः सालसः सालः कल्पवृक्षश्च कल्पितः॥ कल्पहा कल्पहारी महाकेतुः कठोर
कः॥ अनलः पवनपाठः पीठस्थः पीठरूपकः॥ पाठीनः कुलिशी पीनो मेरुधामा महागुणी॥ महानूणीरसंयुक्तो देवदानवदर्पहा
अथर्वशीर्षः सोम्यास्यो ऋक्सहस्रामितेक्षणः॥ यजुःसाममुखो गुह्यो यजुर्वेदविचक्षणः॥ याज्ञिकायतनरूपश्च यज्ञो धरणीपतिः
जंगमी भंगदो भास्वदक्षो भिगमदर्शनः॥ अगम्यः सुगमः खर्वः खेटी खटानभोनयः॥ अमोघार्थः सिंधुपतिः सैंधवः साधुमध्यगः॥ प्र
तापी प्रजपी प्रातर्मध्यान्हसायमध्यगः॥ त्रिकालज्ञः सगणाकः पुष्करस्थः परोपकृत्॥ उपकर्ता पकर्ता च घृणी रणाजयप्रदः॥ धर्मी
चर्मीवरश्चारुरूपश्चारुविशोधनः॥ वश्यो वश्यकरो भस्मश्लाघी भस्मविलेपनः॥ भस्मांगी मलिनांगश्च मालामंडितमूर्धजः॥ गण
कार्यः कुलाचारः सर्वाचारः सखासमः॥ मकारो गोत्रभिज्जो ग्राभी मरूपो भयानकः॥ अरुणाश्चैकचित्तज्ञमस्त्रिशंकुः शंकुधारणः॥ आ
श्रमीव्रतरणो वज्री क्षप्रियकार्यहेतुकः॥ वैश्यः श्रृंगः कपोतस्थः त्वष्टा त्वष्टोरुणाकुलः॥ रोगी रोगापयश्चूरकपिलः बलिनायकः॥ पि
नाकी चाष्टमूर्तिश्च क्षितिमान्मूर्तिमान्तथा॥ जलमूर्तिर्वायुमूर्तिर्हुताशः सोममूर्तिमान्॥ सूर्योदेवायजमानआ— परमेश्वरं॥

रामः
११८

भवहा भवमूर्त्तिश्च भूतात्मा भूतभावनः भवः शर्वस्तथा रुद्रः पशुनाथश्च शंकरः ॥ गिरिजो गिरिजानाथो गिरिशश्च महेश्वरः ॥ गिरीश
खड्गहस्तश्च महानुग्रो गणेश्वरः ॥ भीमईशानो भीतिज्ञः खंडप्रचंडविक्रमः ॥ खंडभृत् खंडपरशुः कृत्तिवासो विषापहः ॥ कंकालः क
लनाशः श्रीकंठो नीललोहितः ॥ गणेश्वरो गुणीनंदी धर्मराजो धुतेरेकः ॥ भृंगिशीरसासारो दयालु रूपमंडितः ॥ अमृतः काल
रुद्रश्च कालाग्निः शशिशेखरः ॥ त्रिपुरांतक ईशास्त्रिनेत्रः पंचवक्त्रकः ॥ कालहृत्केवलात्मा च ऋग्यजुस्साम रूपवान् ॥ ईशानः सर्वदे
वानां ईश्वरः सर्वरक्षसां ब्रह्माधिपतिर्ब्रह्मपतिर्ब्रह्मणोधिपतिस्तथा ॥ ब्रह्मा शिवः सदानंदी सदानंदः सदाशिवः ॥ मेअस्तु रूपश्चावी
गोगायत्री रूपधारणः ॥ अघोरेभ्योथ घोरेभ्यो घोरघोरतरेभ्यश्च ॥ सर्वतः सर्वशर्वेभ्यो नमस्ते रुद्र रूपेभ्यः वामदेवस्तथा ज्येष्ठः श्रेष्ठः
कालः कलनकः ॥ महाकालो भैरवेशो वेशी कालविकरणः ॥ बलविकरणो वा - बलप्रमथनस्तथा सर्वभूतादिदमनो देवदेवो मनोन्म
नः ॥ सद्योजातं प्रपद्यामि सद्योजाताय वै नमः ॥ भवे नवे नाभिभवे भजस्वमा भवोद्भवः ॥ भावनो भवनो भाव्यो वलकारी परं पदं
परः शिवः परो ध्येयः परं ज्ञानं परात्परं ॥ पराशरः समाशी च मांसाशी वेलवो नमः ॥ ॐ ऐं श्रीं क्लीं देवो ॐ ह्रां ह्रौं भैरवो नमः ॥ ॐ ह्रांन

रु॰या
११९

मः शिवायेति मंत्रो वटुवायुधः ॥ ॐ ह्रीं समदाशिव ॐ ह्रीं आयकुमारतोमतः ॥ ॐ ह्रां महाकालाख्यो ॐ ह्रीं वटुकभैरव ॥ भगवास्तै
वको ॐ ह्रीं चंद्रार्धशेखरः ॥ ॐ ह्रीं सज्ञदिलोद्धृतो ॐ ह्रीं त्रिर्यातक ॥ ह्रां ह्रीं हूं हरिवामांगो ॐ ह्रां हुं ह्रीं त्रिपुलोचनः ॥ ॐ वेदरूपे वेद
ज्ञोक्षरपचुस्साम – वान् ॥ रुद्रो घोरास्वो घोरो ॐ क्ष्म ह्रां अघोरकः ॥ ॐ जूं सः पीयूषासक्तो मृतः ध्यधोमृतालय ॥ त्र्यंबकं यजामहे सु
गंधिं पुष्टिवर्द्धनं ॥ उर्वारुकमिव वबंधनान्मृत्योर्मोक्षेयमात्तान् ॥ ॐ ह्रौं जूं सः ॐ भूर्भुवः स्वः ॐ जूं सः मृत्युंजयः १००० इदं नाम्ना
सहस्रं वरहस्यं परमं पदं ॥ सर्वस्वं नाकिनां देवि जंतूनां भुवि का कथा ॥ तव भक्त्या मयाख्यातं त्रिषु लोकेषु दुर्लभं ॥ गोप्यं सहस्रनामेद
साक्षादमृतरूपिणां ॥ यः पठेत्सार्थपिश्चा वयच्छृणुयान्नतः ॥ मृत्युंजयस्य देवस्य फलं तस्य शिवे शृणु ॥ लक्ष्म्या कृष्णो धियाजीवो प्र
तापेन दिवाकरः ॥ तेजसा वह्निदेवस्तु कवित्वे चैव भारविः ॥ शौर्येण हरिसंकाशो नीत्या दुहिणासंनिभः ॥ ईश्वरत्वेन देवेशि मत्समः कि
मतः परं ॥ यः पठेदर्धरात्रेव साधको धीरसंयुतः ॥ पठेत्सहस्रनामेदं सिद्धिमाप्नोति साधकः ॥ चतुःपथे वै कलिंगे मरुदेशे वने जले
श्मशाने प्रांतरे दुर्गे पाठात्सिद्धिर्न संशयः ॥ नौकायां चोरसंघे च संकटे प्राणसंक्षये ॥ यत्र यत्र भये प्राप्ते विषवह्निभयादिषु पठेत्सह

रामः
११९

स्वनामाशुमुच्यते नासंशयः ॥ अमावास – नवमीथे च गात्वपेतालयं सुधी ॥ पठित्वा संभवेद्देवि साक्षाद्विज्ञार्चितगुरौ ॥ ज्ञानी दर्शी दिने
देवि निशायां सरितस्तटे ॥ पठेन्नाम सहस्रं वै जपेदशोत्तरं शतं ॥ सोदर्शनो भवेदाशु मृत्युंजयप्रसादतः ॥ दिगंवरो मुक्तकेशः साधको
दशधा पठेत् ॥ इहलोके भवेद्राजा परे मुक्तिर्भविष्यति ॥ इदं रहस्यं परमं भक्त्या तव मयोदितं मंत्रगर्भं मन्त्रमयं न वाच्यं यदुरात्मने
नोदद्यात्परशिष्येभ्यः पुत्रेभ्योपि विशेषतः ॥ रहस्यं मम सर्वस्वं गोप्यं गुह्यतरं कलौ ॥ परितस्मा – नोक्तं व्यंगोपनीयं तथात्मनः ॥ दुर्जना
द्रक्षणीयं च पठनीयमहर्निशं श्रोतव्यं साधकश्रुत्वा रक्षणीयं च पुत्रवत् ॥ ॥ इति श्रीदेवीरहस्ये तंत्रे मृत्युंजयसहस्रनाम
स्तोत्राख्यातनामचतुश्चत्वारिंशः पटलः ॥ ४४ ॥ ॐ नमः शिवाय ॥ श्रीभैरवः ॥ देवि वक्ष्यामि ते स्तोत्रं सर्वसिद्धिप्रदायकं ॥ मूलमंत्रैक
सर्वस्वरक्षणीयं प्रयत्नतः ॥ दीक्षाकाले च पूजायां जपांते यः पठेच्छिवे ॥ विसर्जनेंतयाहाने दीक्षाफलमवाप्नुयात् ॥ अस्य श्री स्तोत्रराज
स्य ऋषिर्भैरव ईश्वरि ॥ गायत्र्यं छंद इत्युक्तं महामृत्युंजय शिवे देवता ॥ प्रासावीजं शक्तिः शक्तिः स्मृता शिवे ॥ हज्ञं कीलकमित्युक्तं
सूर्येदिग्बंधनं तथा ॥ भोगापवर्गसिद्ध्यर्थं विनियोगः प्रकीर्तितः ॥ चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयांतस्थितं मुद्रापाशमृगा

रु·या
१२०

क्षसूत्रवेलसत्पाणिं हिमांशुप्रभं । कोटीचन्द्रगलत्सुधाप्लुततनुं हारादिभूषोज्वलं ॥ कान्त्या विश्वविमोहनं पशुपतिं मृत्युंजयं भावये
१ पीयूषलक्ष्मीसखा पीयूषद्रववर्षणोर ॥ पीयूषांशुसुधामणिः करतले पीयूषकुंभं वहपीयूषद्युतिसंपुटान्तरगतः पीयूषधार
धरः ॥ मां पीयूषमयूखसुंदरवपुः पीयूषलक्ष्मीसखा पीयूषद्रववर्षणो हरहः प्राणात्तु मृत्युंजयः ॥ २ ॥ देवं दिनेशाग्निशशांकनेत्रं
पीयूषपात्रं कलशं दधानं ॥ दोर्भ्यां सुधांशुद्युतिमिन्दुचूडं नमामि मृत्युंजयमादिदेवं ॥ ३ ॥ चन्द्रमंडलमध्यस्थं रुद्रं वालेन्दुशेखरं
रुद्रशानं स्मरेद्देवं मृत्युं प्राप्नोति जीवति ॥ ४ ॥ चन्द्रमंडलमध्यस्थे रुद्रवालेति विस्मृते ॥ तत्रस्थं चिंतयेत्साध्यं मृत्युं प्राप्नोति जीवति
५ ॥ मात्राक्षं मातृकामौलिं देवकल्पतरोः फलं ॥ योजयेत्स भवेद्विश्ववैभवास्पदमीश्वरः ॥ ६ ॥ कुचवीजं कुलाचारविचारकुशलः शिव
योजयेत्तस्य वक्त्रान्ते नरीनर्ति हि भारती ॥ ७ ॥ शक्तिभक्त्या जपेन्मंत्रं शंभोर्लभालकोपि यः ॥ सजंभारिसमोभूत्वा भूत्वा रमारतं भजेत्
८ ॥ देवेशाकाशवीजं तं विंदेन्दुमंडितं चिंतयेद्यो विमोचितेसशिवाद्वयतां भजेत् ॥ ९ ॥ सविसर्गं भृगुवर्गसर्गप्रलयकारणं ॥ वि
सर्गतो भवेद्योतर्लियतें ने समत्यदे १० लक्ष्मीश्वाक्षरं विंदुभूषणां योजयेत्तव ॥ करे लक्ष्मी सुखे वाणी तस्य शंभोर्हराजयः ॥ ११

राम:
१२०

पालयेन्निमग्नंदेवियोजयेद्धीरसंनिधौ ॥ ससान्नभौमंसाम्राज्यंभजेदन्तेसलोकतां ॥ १२ ॥ ह्रांदेवरदांवीरसाध्वीमधिसर्जिका ॥ ज
पेद्यः स्मारंसोमोदध्धवलंतस्यसामभवेत् ॥ १३ ॥ आकाशविजनाकाशंजपेद्यः कुशसंस्तरे ॥ सकौलिकशिरीरत्नैरंजितांप्रियुगोभवेत् ॥
१४ ॥ शांताबीजंसरेफंकृसंज्ञंभोः पद्मासनेजपेत् ॥ कंकालमालाभरणोभविनाशैरवोपमः ॥ १५ ॥ हूंज्ञबीजंहारहीजंनेजोरूपपचयोज
पेत् ॥ तस्मैदास्यामिमोक्षंमोनिजंधामसनातनं ॥ १६ ॥ अकारंसाकारंगिरिश्रत ~ मंत्रांचलगतंजपेद्योहृद्यंभेमिरूपमयपानंदभरित
ससाम्राज्यंभूमौभजतिरजनीनायककलालसन्मौलिप्रांतेव्रजनशिवसायुज्यपदवीं ॥ ७ ॥ विंदूमूपगात्रिकोणाग्रसारस्वारसास्फु
रदग्रात्रिभूतं ॥ भूग्यहाघमितिचक्रमंडलेत्वानिजस्मरूपसिस्मराम्यहं ॥ १८ ॥ नानाविधानानर्घ्यविभूषणाढ्यंनिःशेषपीयू
षमयूखविंबे ॥ निषसमीशानमहीशघशेषवालीनुतंमृत्युहरंनमामि ॥ १९ ॥ इतिस्तोत्रंदिव्यंसकलमनुराजैकनिकयंपठेद्यः
सूर्जांतेशिवशिवगृहेवार्चनविधौ ॥ सरोगिर्जितावैरीभजतिनृपलक्ष्मीखमहस्राभवेदन्तेवीरःसकलसुरसेव्यः शिवमयः ॥ २० ॥ इतीदं
परमंस्तोत्रंमहामृत्युंजयप्रियं ॥ पठेद्यापारयेन्नित्यंसर्वस्वंदेवदुर्लभं ॥ २१ ॥ अथेदंपरमंतत्त्वंमहापातकनाशनं ॥ महामंत्रमय

विद्यासाधकैःकार्या -- २२ त्रैलोक्यसारभूतंह्येतन्नित्यंसर्वस्वंदेवदुर्लभंतत्वंत्रैलोक्याभयदायकं ॥ पठेन्निशीथेसंवीतुसद्यःसिद्धि
र्भवेत्कलौ । २३ ॥ चतुष्पथेर्धरात्रेतुब्राह्मेवापिमुहूर्त्तके ॥ पठित्वाकौलिकोदेविभवेद्भैरवसंनिभः ॥ २४ ॥ इतीदंममसर्वस्वंरहस्यंप
रमाद्भुतं ॥ यस्यकस्यनदातव्यमित्याज्ञापरमेश्वरी ॥ श्रीदेव्युवाच ॥ भगवन्करुणांभोधेगिरीशाभवनाधुना ॥ श्रोताहंकथनादस्य
पंचांगस्यपरात्मनः ॥ मृत्युंजयस्यदेवस्यदीक्षाफलविधायिनः ॥ किंरीभावमायन्नादस्यस्मिभगवंस्तवश्रीशिवः ॥ इदंपंचांगम
खिलंमहामृत्युंजयस्यच ॥ अदातव्यमभक्तायगोपनीयंस्वयोनिवत् ॥ ॥ इतिश्रीदेवीरहस्येरुद्रयामले -- मृत्युंजयमो
चाख्यानंनामपंचचत्वारिंशःपटलः ॥ ४५ ॥ श्रीमृत्युंजयपंचांगसंपूर्णं ॥ ॐ नमोदुर्गायैनमः ॥ श्रीदेव्युवाच भगवन्सर्व
तंत्रज्ञसाधकानांजयावह ॥ यत्सुरासुचितंदेवदुर्गापंचांगमुत्तमं ॥ सर्वस्वंसर्वदेवानांरहस्यंसर्वमंत्रिणां ॥ तदद्यकृपयाब्रूहियद्य
स्तिमयितेदया ॥ श्रीभैरवः ॥ शृणुतत्त्वतमंदेविपंचांगंतत्त्वलक्षणं ॥ दुर्गायाःसासर्वस्वंनकस्यकथितंमया ॥ तवस्नेहात्प्रवक्ष्यामि
दुर्गापंचांगमीश्वरि ॥ गुह्यंगोप्यतमंदिव्यंनदेयंब्रह्मवादिभिः ॥ यादेवीदैत्यदमनीदुर्गेत्यष्टाक्षरीशिवा ॥ दैवैराराधितापूर्वंब्रह्माद्युत

रमः
१२१

पुरः सौः॥पुरंदरहितार्थायवधार्थायसुरद्विषां॥सैवंसृजतिभूतानिराजसीपरमेश्वरी॥सात्विकीरक्षतिप्रांतेसंहरिष्यतितामसी
इत्थंगुणत्रयीरूपासृष्टिस्थितिलयात्मिका॥तस्यादंबागमधुनारहस्यंत्रिदिवौकसां॥वक्ष्यामिपरमश्रेन्यासंवारक्षयंदुर्गामंत्र
पटलंतत्रवक्ष्यामिदुर्गायास्तत्समुत्तमं॥येनाभ्यर्चनमात्रेणकोटिपूजाफलंलभेत्॥दुर्गायादेविवक्ष्यामिमंत्रोद्धारंपराश्रयं
सर्वतंत्रेषुविख्यातंसर्वकामफलप्रदं॥नास्मायाज्ञात्तिकवाक्षिदुर्गाया — न्यासविध्वंसनेभवाति॥दुर्गायास्तत्वरीतिमूलवि
द्यामंत्रोद्धारंगोपितंप्रक्षरेत्॥नास्यामपरायवाकुत्सेनापिमंत्रास्त्रिह्वयांनोवाक्यासमंत्यायोनाचाररद्युगविस्तवः॥साक्षा
त्सिद्धिप्रदोमंत्रोदुर्गायास्तिनाशनः॥अष्टाक्षरोऽष्टसिद्धीशोगोपनीयोप्रियानरे॥महाबीनक्रमस्थानांसाधकानांजयावहः॥मं
त्रराजोमहादेविसत्योभोगापवर्गदः॥वर्णालक्षपुरश्चर्यातद्दर्शवामहेश्वरि॥एकैकलक्षावधिंतुयोजातोन्यूनतांकदाचन॥मूले
कीलनसिद्धंतुसंजीवनञ्चसंस्कृतं॥पुरश्चर्याविरंत्वभ्यास्यपुनश्चेवरेत्मनुंततोसनजपेन्नित्यंहुणायाद्भ्वारस्सिद्धिदं॥यंजप्ता
साधकोभूमौकिन्नरैश्वरोयथा॥ऋषिरस्यसमोदेविमंत्रस्यायोमहेश्वरः॥छंदोनुष्टुप्देवताचश्रीदुर्गाष्टाक्षरीस्मृतातारंवी

लोकमाज्ञानांविम्बेयंधनमेश्वरि ॥ धर्मार्थकाममोक्षार्थेविनियोगःप्रकीर्तितं ॥ तारंमायाश्रौंईंविन्यासंषड्दीर्घभागिनि ॥ निह
त्यषड्रिपस्देविध्यायदुर्गांकुलेश्वरि ॥ दुर्वानिभांत्रिनयनांविलसत्किरीटांशंखाब्जखड्गशरखेटकशूलचापान् ॥ संतर्जनींचदध
तींमहिषासनस्थांदुर्गायानवारकुलपीठगतांभजेहं ॥ यंत्रोद्धारंप्रवक्ष्यामिदुर्गायाःकुलमंदिरे ॥ स ˉ सिद्धिप्रदंचत्रिकोसवीज्ञापारि
पूरकं ॥ बिंदुस्त्रिकोणारसकोणविंवंवृत्तास्थपत्रांचितांवन्हिभूपुरं ॥ धराग्रहोद्भासितमवज्रकूटंदुर्गाभयंयंत्रमिदंप्रदिष्टं ॥ लयां
गमस्यमंत्रस्यसर्वतंत्रेषुगोपितं ॥ येमोचारणमात्रेणकोटियज्ञफलंलभेत् ॥ गणेशंवटुकंमात्रपुष्पदंचविकर्त्तनं ॥ चतुर्द्वारि
षुदेवेशिपूजयेत्साधकेश्वर ॥ ब्राह्मीनारायणीदेवितथामुंडापराजिता ॥ माहेश्वरीचकौमारीवाराहीनारसिंहिकापूज्याव
सुदलेदेविभैरवानेश्चपार्वति ॥ असितांगोरुरुश्चंडःक्रोधोन्मत्तकपालक ॥ भीषणश्चैवसंहारोवामावर्त्तेनसाधकेः ॥ पूज्य
पृथक्पृथक्देविगंधपुष्पाक्षतैःशिवे ॥ दत्वापुष्पांजलिंचक्रेमूलमुच्चार्यसाधकः ॥ पूजयेत्तुलक्ष्मिजन्मैःषडंगषडुसावि
काः ॥ शैलपुत्रीस्ववामाग्रेपूजयेब्रह्मचारिणीं ॥ चंडघंटांचकूष्मांडांस्कंदमातरमीश्वरि ॥ कात्यायनीचसंपूज्यदुर्गांगपाश्वतेः

परं ॥ पुनः पुष्पांजलिं दत्वा श्रीचक्रे परार्थदे ॥ पूजयेद्देवतास्तिस्रः कुलख्याः त्रिपुराम्बिकाः ॥ कालरात्री महागौरी देव इतीति पार्वतित्रि
कोणाग्राच्छिवे पूज्याः सिंदूराक्षतपुष्पकैः ॥ दूर्वादलांजलिं दत्वा यन्त्रराजे स्वसिद्धये ॥ पूजयेदंबिकां दुर्गां अष्टाक्षरविभूषणां ॥ विंदौदे
वीमष्टभुजां विद्यामष्टाक्षरीं शिवे ॥ नीलकंठ शिवे विंदौ पूजयेज्जगदंबिकां ॥ तत्रायुधानि देवेशि पूजयेत्सर्वसाधकः ॥ ह्रांखपमसिं
वाणान्धनुः खेटकमीश्वरि ॥ शूलसंतर्जनीं दिव्यांनानायुधैः समर्चयेत् ॥ देवदेव्यो विंदुपीठे पूजयेत्सर्वसिद्धये ॥ अथ वक्ष्ये महादेवि
प्रयोगान्स्वसिद्धये ॥ यान्विधाय कलौ मंत्री भवेत्कल्पद्रुमोपमः ॥ स्तंभनं मोहनं चैव मारणाकर्षणौ पुनः ॥ ततः वशीकारं तथोच्चाटं
शांतिकं पौष्टिकं ततः ॥ यथैषां साधनमावक्ष्ये प्रयोगानां महेश्वरि ॥ महाचीनक्रमस्थानां साधकानां हिताय च ॥ अयुतं तु जपेन्मूलं
श्मशाने निशि साधकः ॥ हुनेद्दशांशतः सर्पिर्यवान्मांसान्समायुतान् ॥ स्तंभनं जायते क्षिप्रं वादिकामिजनाभस्मां राप्रयुतं प्रजपेद्दि
विवं रुद्राक्षमालया ॥ होमो दशांशतः कार्यो घृतपद्माक्षपंकजैः ॥ आमस्वधैः सुधामूलैर्मोहनं जायते क्षणात् ॥ देवानां दानवानां च
कावंधात्यधियानराणां ॥ २ ॥ अयुतं प्रजपेन्मूलं वने साधकसत्तमः ॥ वेतसीमूलगो वापि हुतेन तद्दशांशतः ॥ घृतपापसंभूकान्

दु॰या
१२३

रिपुमृत्युमुखंव्रजेत् ॥ ३ ॥ अयुतंप्रजपेद्रात्रौ भूम्यागारेकुलेश्वरि ॥ होमोदशांशतःकार्योघृतमांसशरीरके ॥ कपिबीजैरपिप्रात
र्भवेदाकर्षणंस्त्रियाः ॥ ४ ॥ अयुतंप्रजपेन्मूलंचत्वरेत्वरितंरुजेत् ॥ आज्याक्तशुष्करपाखंडरक्तपुष्पाणिपार्वति ॥ दशांशोपिवशतामेति
किंपुनःक्षुद्रभूमिपः ॥ ५ ॥ अयुतंप्रजपेन्मूलंसाध्यकोश्वत्थमूलकः ॥ हुनेदाज्यंदशांशेनकेशस्त्रीणांत्वचंकराः ॥ रिपुमुच्चाटयेद्यु
ग्रंयदिशक्रसमोभवेत् ॥ ६ ॥ अयुतंप्रजपेन्मूलंसरक्तुमतलेहुनेत् ॥ घ–डकुसुमंगानिनानापुष्पाणिरक्तकः ॥ रोगोपद्रवका
लस्यसद्यःशांतिर्भविष्यति ॥ ७ ॥ अयुतंप्रजपेन्मूलंलीलोपवनमंडले ॥ होमोदशांशतःकार्योघृतमीनाजमस्तके ॥ पादैरष्ट
भिर्ग्रामानिसद्यःपुष्टिःप्रजायते ॥ ८ ॥ इत्येषपटलोदिव्योमन्त्रसर्वस्वरूपवान् ॥ दुर्गारहस्यमन्त्रोपिगोपनीयोमुमुक्षुभिः ॥
इतिश्रीदेवीरहस्येतन्त्रेदुर्गारहस्यविधिर्नामषट्चत्वारिंशःपटलः ॥ ४६ ॥ श्रीभैरव ॥ शृणुपार्वतिवक्ष्यामिपद्धतिंराज्यरूपिणी
यस्यश्रवणमात्रेणकोटियज्ञफलंलभेत् ॥ ब्राह्मेमुहूर्तेचोत्थायबद्धपद्मासनःस्वशिरःस्थसहस्राराधोमुखकमलकर्णिकांतर्गतं
निजगुरुंश्वेतवर्णंश्वेतालंकारालंकृतं ॥ द्विभुजंस्वशक्त्याश्लिष्टंतांवराभूषितयावामांगेसहितंध्यात्वामानसैरुपचारैः ॥ संपूज्यदेहव

राम॰
१२३

स्मरामेत्॥अखंडमंडलाकारंव्याप्तंयेनचराचरं॥तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः॥इतिध्यात्वातदाज्ञांगृहीत्वावहिरागत्य
मलमूत्रादिकंत्यज्यवर्णोक्तशौचमाचस्ययनद्यादौगत्वासुकूर्चंसदशांगुलं॥ॐक्लींकामदेवायसर्वजनमनोहरायनमः॥इतिदं
तान्विशोध्यचाग्निकवीजेनमहृषषंक्षविधायप्रणवेनमुखंत्रिःप्रोक्षः॥ॐह्रींमणिधरिवज्रिणिशिखापरिसेरक्षरक्षहुंफट्स्वा
हेतिशिखांवध्वातत्त्वत्रयेणाचम्यमूलेनप्राणायामं॥विधायमलापकर्षणस्नानंकृत्वामंत्रस्नानंचरेत्॥नमोमूलेनमृत्स्नामानीयज
लंप्रोक्षयेत्॥मंत्रमृदासूर्यमंडलंविचिंत्यगंगेचेत्यादितीर्थान्यावाह्यजलेयंत्रिभावसतीलकंठांदुर्गामावाहयेत्॥मंत्रषडंगंविधा
यदेवींसशिवांध्यात्वामूलंयथाशक्त्याजप्त्वात्रिरुन्मज्जेत्॥तत्रकुंभमुद्रयावध्वास्वमूर्द्ध्निदेवदेवीजलेनस्नापयित्वा॥ॐह्रांह्रींसमाविधा
यपूर्वसंध्यांकृत्वाषडंगंकृत्वाचुलकेनजलमादायतत्त्वमुद्रयाछाद्यहंवंलंइतित्रिभिरभिमंत्र्यमूलमुच्चरन्गलितदकविंदुभिःस॥
धास्वशिरस्याभ्युक्ष्यसव्यहस्तेशेषमुदकंधत्वाइडुयांतर्नीत्वादेहान्तःपापप्रक्षाल्यपिंगयाविदित्यपुरःकल्पितवज्रशिलायांवामेफडि
तिनिक्षिपेत्॥इत्यघमर्षणंविधायपूर्ववदाचम्यजलेयंत्रध्वामूलंयथाशक्त्यानजप्त्वामूलविद्यांतेसांगैःसवाहनैःसायुधैःसपरिछदैः

श्रीनीलकंठसहितमानदुर्गेतृप्यतां॥ इत्यष्टवारं संतर्प्य नीलकंठं त्रिः संतर्प्य स्वैकाञ्जलिना परिवारदेवताः॥ संतर्प्य देवदेव्यौ हृदि ध्यात्वाञ्जलेश्चतुरश्रं विलिख्य तत्रैशानादिक्रमेण गुरुपंक्तिं संतर्प्य देवीं गायत्रीं जपेत्॥ ॐ दुं दुर्गायै विद्महे अष्टाक्षरायै धीमहि तन्नो चंडी प्रचोदयात्॥ यथाशक्त्या प्रजप्य गायत्र्यानमा देवीदेवयोरर्घ्यत्रयं दत्वा देवदेव्योर्जपं समर्प्य यागमंडपमागच्छेत्॥ इति स्नानविधिः॥ ततो यागगृहमागत्य पादौ प्रक्षाल्याचम्य द्वारदेवीः पूजयेत्॥ ॐ गां गूं गणेशाय नमः॥ पूर्वे॥ ॐ ह्रीं वं वटुकाय दक्षिणे ॐ क्षां क्षेत्रपालाय पश्चिमे॥ ॐ यां यूं योगिनीभ्यो उत्तरे· गं गंगायै· यं यमुनायै सौः सरस्वत्यै·मध्ये· इति संपूज्य गृहांतः प्रविश्य यथार्हमासनं शोधयेत्॥ ॐ आसनमंत्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता॥ आसनशोधने विनियोगः ॐ ह्रीं पृथिव्यै नमः॥ महित्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं च धारय मां देवि पवित्रं कुरु चासनं॥ ॐ आधारशक्तये॥ मूलप्रकृत्यै ॐ अनंताय पद्माय पद्मनालायः नत्रोपविश्य तालत्रयं कुर्यात्॥ अपसर्पन्तु इत्यादिना तालत्रयं दत्वा वामपार्ष्णिघातत्रयेण विघ्नानुत्सार्य नाराचमुद्रां प्रदर्श्य विघ्नानुत्सार्य गुरून् प्रणमेत्॥ अखंडमंडलाकारेत्या – नास्ववामे गुं गुरुभ्यो नमः परमगुरुभ्यो परापरगुरुभ्यो· परमेष्ठिगुरुभ्यो इति गंधाक्ष

तेरभ्यर्च्य न्यासपूर्वं संकल्पं कुर्यात् ॥ अस्य श्रीदुर्गामंत्रस्य महेश्वर ऋषिः अनुष्टुप् छंदः ॥ श्रीदुर्गा देवता ॥ दुं बीजं ह्रीं शक्तिः ॐ कीलकं
नमः इति दिग्बंधः ॥ विनियोगः अथ न्यासः महेश्वरऋषये नमः शिरसि अनुष्टुप्छंदसे नमो मुखे ॥ दुर्गादेवतायै हृदि ॥ दुं बीजाय
नाभौ ॥ ह्रीं शक्तये गुह्ये ॐ कीलकाय पादयोः ॥ नमो दिग्बंध इति सर्वांगे ह्रामित्यादि करन्यासः ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः हृदयादिन्यासः ॥
अथ मूलन्यासः ॥ ॐ नमः शिरसि ह्रीं नमो मुखे दुं नमो वक्षसि ॥ दुं नमो भुवयोः गां नमो नाभौ यै नमो पृष्ठे नं नमो जान्वोः मः नमः पा
दयोः ॥ [illegible] ॐ आत्मतत्त्वाय नमः ॥ शिरसि ह्रीं विद्यातत्त्वाय नमो मुखे ॐ दुं शिवतत्त्वाय नमो हृदये ॥ ॐ गुरुतत्त्वाय नमो
नाभौ ॥ ॐ शक्तितत्त्वाय नमो जंघयोः ॥ ॐ दुं शिवतत्त्वाय नमः पादयोः अं कं ५ आं हृदि इं चं ५ ईं शिरसि उं टं ५ ऊं शिखा ॥ एं तं ५ ऐं कव
चे ओं पं ५ औं नेत्रे अं यं १० अः अस्त्रे एवं करन्यासः ॥ अं शिरसि आं मुखवृत्ते इं दक्षनेत्रे ईं वामे उं दक्षकर्णे ऊं वामे ॥ ऋं दक्षगंडे ॠं वा
मे ॥ लृं दक्षनासापुटे ॡं वामे एं ऊर्ध्वोष्ठे ऐं अधरे ओं ऊर्ध्वदंतपंक्तौ औं अधः अं शिरसि अः नमो मुखे ॥ कं दक्षबाहुमूले खं कूर्परे गं
मणिबंधे घं अंगुलिमूले ङं अंगुल्यग्रे ॥ चं वामबाहुमूले छं कूर्परे जं मणिबंधे ॥ झं अंगुलिमूले ञं अंगुल्यग्रे टं ५ दक्षपादे तं ५ वामपा

दं॥ पं दक्षपार्श्वे· फं वामपार्श्वे बं पृष्ठे· भं नाभौ· मं जठरे· यं हृदि· रं दक्षांसे· लं ककुदि· रं दक्षांसे· लं ककुदि· वं वामांसे· शं हृदादिदक्षपाणाग्रां
तं· षं वामपाणाग्रांतं - हृदादिदक्षपादाग्रांतं· हं वामपादाग्रांतं॥ लं पादादिशिरःपर्यंतं क्षं नमः शिरसः पादपर्यंतं निर्व्यापयेत्॥ व्य
वं न्यासं विधाय पूर्ववत्षडंगं कृत्वा॥ प्रणमेन प्राणायामत्रयं विधाय॥ तत्त्वत्रयेणाचमनप्राणायामप्रयोगेन भूतशुद्धिं कुर्यात्॥ ॐ हुं
आकुंचनेन उन्मार्तन्मेना प्रदीपकलिकाकारं तेजो ब्रह्मपथांतर्नीत्वा परमे शिवेन समानीत सुधाम्नृस्थाकुलगुरुं ध्यात्वा तथैव स
मर्प्य पुनस्तेनैव मार्गेण षड्चक्रकुलं भित्वा तत्तेजः स्वस्थानमानीय यं वायुबीजेन षोडशधाजप्तेन वामकुक्षिगतं पापपुरुषं कृष्ण
वर्णं रक्तश्मश्रुलं अंगुष्ठमात्राकारं ध्यात्वा शोषयेत्॥ रमिति वह्निबीजेन षोडशवारजप्तेन तं दाहयेत्॥ लमिति इंद्रबीजेन षोड
शधाजप्तेन गलच्चंद्रामृतं तत्पृथ्व्या प्लावयेत्॥ वमित्यमृतबीजेन षोडशधाजप्तेन स्वात्मानं दिव्यदेहं भावयेत्॥ इति भूतशुद्धिं कृत्वा
प्राणप्रतिष्ठां कुर्यात्॥ ॐ क्रीं हुं आं ह्रीं क्रौं सोहं हंसः मम प्राणा इह प्राणा मम जीव इह स्थितः मम वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणप्रा
णा इहैवागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठाक्रमः॥ इति प्राणान् संस्थाप्य पूर्ववत्षडंगं विधाय आचम्य मूलदेवीं ध्यायेत्

म्भोरुहनागदलहृत्तरसारराविंदुस्थसन्महिषपीठगतां भवानी ॥ रवींदलाग्रसदृशाक्षिविमस्ववाहुं दुर्गां भजे त्रिनयनां विलसं
त्रिबीजां ॥ इति ध्यात्वा मूलांगन्यासं विधाय श्रीचक्रं त्रिवृत्तं षट्पत्रं त्रिकोणं बिंदु विचिन्त्य वा ३ – – – न वि लिख्य वा विभाव्य पीठ
पूजां कुर्यात् ॐ ह्रीं मंडूकाय नमः ॥ चतुर्द्धारकालाग्निरुद्राय मूलप्रकृत्यै २ आधारश – कूर्माय २ अनंताय २ वाराहाय २ पृथिव्यै २ सुप
र्युपरि संस्थसुधार्णवाय २ मध्ये नवरत्नविराजितनवरत्नखंडमयद्वीपाय नमः ॥ २ पद्मरागखंडाय २ स्वर्णगिरये २ नंदनो·
द्यानाय २ कल्पवनाय २ पद्मवनाय २ विचित्ररत्नखचितभूमिकायै २ चिंतामणिमंटपाय २ नवरत्नखचितनवरत्नमयवेदिकायै २
नवरत्नसिंहासनाय २ तन्मध्ये सहस्रारपद्माय २ प्रकृतिमयपत्रेभ्यो २ विकारमयकेसरेभ्यो मध्ये अष्टधाजभूषितकर्णिकायै २ तत्पार्श्वे
धर्माय २ ज्ञानाय २ वैराग्याय २ वामत अधर्माय २ अवैराग्याय अज्ञानाय २ अनैश्वर्याय इति संपूर्णमध्ये सत्वरजस्तमेभ्यो २ मूलविद्या
मुच्चार्य मातृकां प्रोच्चार्य श्रीयोगपीठाय नमः ॥ इत्यभ्यर्च्य पात्रार्चनं कुर्यात् तत्र स्ववामे त्रिकोणचतुरस्रं मंडलं विधाय मूलेनाभ्यर्च्य म
दुर्गासामान्यार्घ्याय ॥ न मंडलं षडंगेनाभ्यर्च्य तत्र अस्त्रक्षालितं शंखं संस्थाप्य शंखे अं अर्कमंडलाय द्वादशकलात्मने ॥ विलोमम

त्मकायासंपूर्य्यसोः सप्तमंडलाय षोडशकलाय — ॥ इत्यभ्यर्च्य मूलेनाष्टाभिमंत्रितं कृत्वा गंगे च यमुने चैवेति तीर्थमावाह्य सुधिभावये
दिति सामान्यार्घ्यविधि सामान्यार्घ्यं वएवा — त्रिकोणषट्कोणवृत्तचतुरस्रमंडलं कृत्वा तन्मंडलं षडंगेनाभ्यर्च्य मूलमुच्चार्य श्रीदुर्गाक
लशमंडलाय नमः एवं च मूलेनाभ्यर्च्य तत्र अस्त्रक्षालितां त्रिपादिकां संस्थाप्य रं वह्निमंडलाय दशकलात्मने ॥ इत्यभ्यर्च्य ॥ तत्र अस्त्र
क्षालितं कलशं संस्थाप्य अं अर्कमंडलाय द्वादशकलात्मने ॥ इत्यभ्यर्च्य गंधपुष्पैरभ्यर्च्य तत्र अनामिकांगुष्ठकराम्रतधारापातेन कलशाना
पूर्य्य सोः सोममंडलाय षोडशकलात्मने ॥ तत्राभ्यर्च्य ॥ अं क्षां कुं रुं दां धां ईं दैं वौं दः ऊं अं अमृते अमृतोद्भवे अमृतवर्षिणि अमृतं स्राप
य शुक्रशापं मोचय २ ऊं ह्रीं दुर्गायै वौषट् इति सप्तधाभिमंत्र्य ऊं ह्रीं हुं अहसक्षमलवरयूं आनंदभैरवाय वौषट् ऊं ह्रीं हुं आनंद
भैरवी श्री पादुकाभ्यो नमः ॥ इति संपूज्य धेनुयोनिमुद्रां प्रदर्श्य सूर्यमंडलासंभूते एकमेव परंब्रह्म सपावमानः परानंदः पावमानः प
रोरसः पावमानः परंज्ञानं तेन तेनाशयाम्यहं वेदमंत्र प्रणवो बीजमित्यादि ॥ ब्रह्मशापविमुक्तासि त्वमुक्ता तव शापतः विमुक्ता रुद्र
शापेन पवित्रा भव सर्वदा ॥ इति कलशं संपूज्य धेनुयोनिमत्स्यमुद्राः प्रदर्श्य गरुडमुद्रयाच्छादयेदिति द्रव्यशुद्धिः ॥ उक्ताबोहरि

